A.C. Joshi Library
P.U. Chandigarh

MSS No. 334 Subject Religion.

Name of MSS ब्रह्मवैवर्त महापुराण – प्रकृति खण्ड

Author Not Given

Period Folios 194

Script Sanskrit Source Prithi Pal Singh

Missing Folios 22A-23, 57A-58, 77A-78, 127A-128

ब्रह्मवैवर्त महापुराण

334-Ms. विषय सूचि:
प्रकृति खण्ड
१६४ पत्रक ॥ ल० अ० १० पं० प्र० पृ०

335-Ms. ब्रह्म खण्ड ; १८८८ वि० लि०
१२ पत्रक ल० अ० ६ पं० प्र० पृ०
खोज आगे

No 19

RIHIM VIVRRT MAHA PURAN

PRAKIRTI KHAND

Brahmavaivarta Puran

Prakriti Khanda

334

ब्रह्मवैवर्त पुराण प्रकृतिखण्ड

334

1

प्र॰ कृ॰ ति॰ १

ॐ स्वस्ति श्रीगणेशाय नमः ॐ नारद उवाच ॐ गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती
सावित्री च सृष्टिविधौ प्रकृतिः पंचधा स्मृता १ आविर्बभूव सा केन सा वा का ज्ञानिनां वर किं
वा तल्लक्षणं शाकं बभूव पंचधा कथं २ सर्वासां चरितं पूजाविधानं गुणमीप्सितम् अ
वतारं कुत्र कस्यास्तन्मां व्याख्यातुमर्हसि ३ श्रीनारायण उवाच प्रकृतेर्लक्षणं वत्स को वा व
क्तुं क्षमो भवेत् किंचित्तथापि वक्ष्यामि यच्छ्रुतं धर्मवक्त्रतः ४ प्रकृष्टवाचकः प्रश्च कृति
श्च सृष्टिवाचका सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता ५ गुणे प्रकृष्टसत्वे च प्रशब्दो
वर्तते श्रुतौ मध्यमे रजसि कृश्च तिशब्दस्तमसि स्मृतः ६ त्रिगुणात्मस्वरूपा या सर्वश
क्तिसमन्विता प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते ७ प्रथमे वर्तते प्रश्च कृतिश्च सृ
ष्टिवाचकः सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्तिता ८ योगेनात्मा सृष्टिविधौ द्विधारूपो
बभूव सः पुमांश्च दक्षिणार्धांगो वामांगः प्रकृतिः स्मृता ९ सा च ब्रह्मस्वरूपा च माया नि
त्या सनातनी यथात्मा च तथा शक्तिर्यथाग्नौ दाहिका स्थिता १० अत एव हि योगींद्रः स्त्री
पुंभेदं न मन्यते सर्वं ब्रह्ममयं ब्रह्मन् शश्वत्पश्यति नारद ११ स्वेच्छामयः स्वेच्छया च श्रीकृष्णस्य
सिसृक्षया साविर्बभूव सहसा मूलप्रकृतिरीश्वरी १२ तदाज्ञया पंचविधा सृष्टिकर्मविभे-

१

1A

।

दतः अथ भक्तानेवोथाद्या भक्तानुग्रहविग्रहा १३ गणेशमातादुर्गाया शिवरूपा शिवप्रि
या नारायणी विश्वमाया पूर्णब्रह्मस्वरूपिणी १४ ब्रह्मादिदेवैर्मुनिभिर्मनुभिः पूजिता स्तु
ता सर्वाधिष्ठातृदेवी सा सर्वरूपा सनातनी १५ धर्मसत्यपुण्यकीर्तियशोमंगलदायिनी
सुखमोक्षहर्षदात्री शोकार्तिदुःखनाशिनी १६ शरणागतदीनार्तपरित्राणपरायणा
तेजःस्वरूपा परमा तदधिष्ठातृदेवता १७ सर्वशक्तिस्वरूपा च शक्तिरीशस्य संततं सिद्धे
श्वरी सिद्धरूपा सिद्धिदा सिद्धिदेश्वरी १८ बुद्धिर्निद्रा क्षुत्पिपासा छाया तन्द्रा दया स्मृतिः
जातिः क्षांतिश्च शांतिश्च कांतिर्भ्रांतिश्च चेतना १९ तुष्टिः पुष्टिस्तथा लक्ष्मीर्धृतिर्माता
तथैव च सर्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनः २० उक्तः श्रुतौ श्रुतगुणाः श्रुतस्वल्पो
यथागमं गुणोऽस्त्यनंतोऽनंताया अपरां च निशामय २१ शुद्धसत्वस्वरूपा या पद्मा सा पर
मात्मनः सर्वसंपत्स्वरूपा सा तदधिष्ठातृदेवता २२ कांता दांता तिशांता च सुशीला
सर्वमंगला लोभमोहकामक्रोधमदाहंकारवर्जिता २३ भक्तानुरक्ता पत्युश्च सर्वाभ्य
च पतिव्रता प्राणतुल्या भगवतः प्रेमपात्री प्रियासदा २४ सर्वसस्यात्मिका सर्वजीव
नोपायरूपिणी महालक्ष्मीश्च वैकुंठे पतिसेवारता सती २५ स्वर्गे च स्वर्गलक्ष्मीश्च

2

प्रं
कृ नि०
२

राजलक्ष्मीश्चराजसु गृहेचगृहलक्ष्मीश्च मर्त्यानांगृहिणांतथा २६ सर्वप्राणिषु
द्रव्येषुशोभारूपामनोहरा प्रीतिरूपापुण्यवतीप्रभारूपानृपेषुच २७ वाणिज्यरू
पावणिजांपापिनांकलहांकुरा दयामयीभक्तमाताभक्तानुग्रहकातरा २८ च
पलेचपलाभक्तिःसंपदेरक्षणायच जगज्जीवन्मृतंसर्वंययादेव्याविनामुने २९
शक्तिर्द्वितीयाकथितावेदोक्तासर्वसंमता सर्वपूज्यासर्ववंद्याचान्यांमत्तोनिशामय ३०
वाग्बुद्धिविद्याज्ञानाधिदेवतापरमात्मनः सर्वविद्यास्वरूपायासाचदेवीसरस्वती ३१
सुबुद्धिःकवितामेधाप्रतिभास्मृतिदासतां नानाप्रकारसिद्धांतभेदार्थकल्पनाप्रदा
व्याख्याबोधस्वरूपाचसंदेहसर्वभाजिनी विचारकारिणीग्रंथकारिणीशक्तिरूपिणी
स्वरसंगीतसंधानतालकारणरूपिणी विषयेज्ञानवाग्रूपाप्रतिविश्वेषुजीविनां ३
४ व्याख्यामुद्राकराशांतावीणापुस्तकधारिणी शुद्धसत्वस्वरूपाचसुशीलाश्रीह
रिप्रिया ३५ हिमचंदनकुंदेंदुकुमुदांभोजसन्निभा जपंतीपरमात्मानंश्रीकृष्णंरत्न
मालया ३६ तपःस्वरूपातपसांफलदात्रीतपस्विनां सिद्धिविद्यास्वरूपाचसर्व
सिद्धिप्रदासदा ३७ विषयज्ञानवाग्रूपाप्रतिविश्वेषुजीविनां ययाविनाचविश्वौ

२

2A ज्ञोमृकोस्तसमः सदा देवीस्तनीयागदिनार्सस्तुत्काजगदंविका यथागमंयया।
किंचित्परांसनिवोधमे मानाचवर्णावेदानांवेदांगानांचछंदसां संध्यावंदनमंत्रा
णांतंत्राणांचविचक्षणा द्विजातिजातिरूपाचजपरूपातपस्विनी ब्रह्मण्यतेजोरूपा
चसर्वसंस्कारकारिणी ४१ पवित्ररूपासावित्रीगायत्रीब्रह्मणःप्रिया तीर्थानियः
स्याःसंस्पर्शंदर्शंवांछेनिस्सद्ध्ये ४२ शुद्धस्फटिकसंकाशाशुद्धसत्वस्वरूपिणी परमा
नंदरूपाचनिर्वाणपददायिनी ४३ ब्रह्मतेजोमयीशक्तिस्तदधिष्ठातृदेवता यः
स्यादतेजसापूतंजगत्सर्वंचनारद ४४ देवीचतुर्थीकथितापंचमींचनिशामय प्रे
मप्राणाधिदेवीयापंचप्राणास्वरूपिणी ४५ प्राणाधिकाप्रियतमासर्वाभ्यःसुंदरीव
रा सर्वसौभाग्ययुक्ताचमानिनीगौरवान्विता ४६ वामांगार्द्धस्वरूपाचगुणेनतेज
सासमा परावरासारभूताचपरमाद्यासनातनी ४७ परमानंदरूपाचधन्यामान्याचपू
ज्जिता रासक्रीडाधिदेवीचकृष्णस्यपरमात्मनः ४८ रासमंडलसंभूतारासमंडलमं
डिता रासेश्वरीसुरसिकारासेरासनिवासिनी ४५ गोलोकवासिनीदेवीगोपीवेश
विधायिका परमाल्हादरूपाचसंतोषहर्षरूपिणी ४६ निर्गुणाचनिराकारानि।

प्रकृ
ति.
३

र्लिप्तात्मस्वरूपिणी निरीहा निरहंकारा भक्तानुग्रहविग्रहा ४७ वेदानुसारध्याने
न विज्ञाना सा विचक्षणैः दृष्टिदृष्टा न सा हृष्टैः सुरेंद्रैर्मुनिपुंगवैः ४८ वह्निशुद्धांशुका
धाना रत्नालंकारभूषिता कोटिचंद्रप्रभापुष्टपुष्टश्रीयुक्तविग्रहा ४९ श्रीकृष्ण
भक्तिदास्यैकदात्री च सर्वसंपदां अवतारे च वाराहे वृषभानुसुता च या ५० यत्पाद
पद्मसंस्पर्शपवित्रा च वसुंधरा ब्रह्मादिभिरदृष्टा या सर्वदृष्टा च भारते ५१ स्त्रीरत्नसा
रसंभूता कृष्णवक्षःस्थलोज्ज्वला यथा घने नवघने लोलासौदामिनी मुने ५२ षा
ष्टिवर्षसहस्राणि तेपे ब्रह्मा पुरा यत्पादपद्मनखरदृष्टये चात्मशुद्धये ५३ न च दृ
ष्टं च स्वप्नेपि प्रत्यक्षस्यापि का कथा तेनैव तपसा दृष्टा भुवि वृंदावने वने ५४ का
थिता पंचमी देवी सा राधा परिकीर्तिता अंशरूपा कलारूपा कलांशांशसमुद्भवा ५५
प्रकृतेः प्रतिविम्बेषु देव्यश्च सर्वयोषितः परिपूर्णतमाः पंचविधा देवी प्रकीर्तिता ५६
या या प्रधाना सा रूपा वर्णयामि निशामय प्रधानांशस्वरूपा च गंगा भुवनपावनी ५७
विष्णुविग्रहसंभूता द्रवरूपा सनातनी पापिपापेध्मदाहाय ज्वलदिंधनरूपिणी
सुखस्पर्शी स्नानपानैर्निर्वाणपददायिनी गोलोकस्थानप्रस्थानसुखसोपान

3A रूपिणी पवित्ररूपा तीर्थानां सरितां च परात्परा । शंभोर्मौलिजटामेरुमुक्तापंक्तिस्वरूपिणी
६१ तपःसंपादनी सद्यो भारते च तपस्विनां । चंद्रपद्मक्षीरनिभा परमासत्तद्रूपिणी ६२ प
थानांशस्वरूपा च तुलसी विश्वकामिनी । विश्वभूषणरूपा च विश्वपादस्थिता सती ६३
तपःसंकल्पसज्यादिसद्यःसंपादिनी मुने । सारभूता च शुद्धानां पवित्रशुद्धपदा सदा ६४
दर्शनस्पर्शनाभ्यां च सद्यो निर्वाणदायिनी । कलौ कल्मषशुष्केध्मदाहनाग्निस्वरूपिणी ६५
स्प ६ यत्पादपद्मसंस्पर्शात्सद्यः पूता वसुंधरा । यत्स्पर्शदर्शं वांछंति तीर्थानि चात्मशुद्धये ६६
यया विना च विप्रेषु सर्वकर्माणि निष्फलं । मोक्षदा या मुमुक्षूणां कामिनां सर्वकामदा
६७ कल्पवृक्षस्वरूपा च भारते वृक्षरूपिणी । त्राणाय भारतीनां च पूजया परदेवता ६७ सुधा
नाशस्वरूपा या विश्वसृजा परायणा । तपोरूपा तापसी च फलदात्री तपस्विनी ६८ दिव्यंत्रि
लोकवर्षं च तपस्तेपे यया हरेः । तपस्विनी सुपूज्या च तपस्विषु च भारते ६९ सर्वमंत्राधि
देवी च ज्वलंती ब्रह्मतेजसा । ब्रह्मस्वरूपा परमा ब्रह्मभावनतत्परा ७० जरत्कारुमुनेः
पत्नी कश्यपांशा पतिव्रता । आस्तीकस्य मुनेर्माता प्रवरस्य तपस्विनी ७० प्रधानांशस्वरू
पा या देवसेना च नारद । मातृकासु पूज्यतमा सा च षष्ठी परिकीर्तिता ७२ शिशूनां प्रति

५

ब्र॰ प्र॰ ति॰ ५

विश्वेष्वेप्रतिपालनकारिणी तपस्विनी विश्वभक्ताकार्त्तिकेयस्यकामिनी ७३ षष्ठांश
रूपाप्रकृतेस्तेन षष्ठी प्रकीर्त्तिता पुत्रपौत्रप्रदात्रीच धात्रीत्रिजगतामपि ७४ सुंदरीयु
वतीरम्या सततंभर्तुरंतिके स्थानेशिशूनांपरमावृद्धरूपाचयोगिनी ७५ पूजाद्वादश
मासेषु यस्याविश्वेषुसंततं पूजाचसूतिकागारेपुराषष्ठदिनेशिशोः ७६ एकविंश
तिमेचैवपूजाकल्याणहेतुकी मवन्नियमितात्वेषानित्याकाम्यास्ततःपरा ७७ मातृरू
८९ पादयारूपाशस्वद्दुग्धरूपिणी जलेस्थलेचांतरिक्षेशिशूनांस्वप्नगोचरे ७७ प्रधानांश
स्वरूपाचदेवीमंगलचंडिका प्रकृतेर्मुखसंभूतासर्वमंगलदासदा ७८ सृष्टौमंगलरू
पाचसंहारेकोपरूपिणी तेनमंगलचंडीसाप्रकृतिंपविकीर्तिता ७९ प्रतिमंगलवारे
षुप्रतिविश्वेषुवंदिता पंचोपचारैर्भक्त्याचयोषिद्भिःपरिपूजिता ८० पुत्रपौत्रधनैश्वर्य
यशोमंगलदायिनी शोकसंतापपापार्त्तिदुःखदारिद्र्यनाशिनी ८१ परितुष्टासर्ववां
छाप्रदात्रीसर्वयोषितां रुष्टाक्षणेनसंहर्तुंशक्ताविश्वंमहेश्वरी ८२ प्रधानांशस्वरूपा
चकालीकमललोचना दुर्गाललाटसंभूतारणेशुंभनिशुंभयोः ८३ दुर्गार्द्धांशस
मद्भूतागुणेनतेजसासमा कोटिसूर्यप्रभाजुष्टपुष्टजाज्वल्यविग्रहा ८४ प्रधानंसर्व ५

4A शक्तीनांवरा बलवतीपरा सर्वसिद्धिप्रदादेवीपरमासिद्धयोगिनी ८५ कृष्णभक्ता
कृष्णतुल्यातेजसाविक्रमैर्गुणैः कृष्णभावनयाशश्वत्कृष्णवर्णासनातनी ८६ सं
सर्व३ हर्तुंब्रह्मांडंशश्वन्निश्वासमात्रतः रणेदैत्यैःसमंतस्याः क्रीडयालोकशिक्षया ८७
धर्मार्थकाममोक्षांश्चददातिधात्रीचपूजिताः ब्रह्मादिभिःस्तूयमानामुनिभिर्मनुभि
धप र्नरैः ८८ प्रधानांशस्वरूपाचप्रकृतेश्चवसुंधरा आधाररूपासर्वेषांसर्वसंपत्प्रसूति
का ८९ रत्नाकरारत्नगर्भासर्वरत्नाकराश्रया प्रजाभिश्चप्रजेशैश्चपूजितावंदिता
सदा ९० सर्वोपजीव्यरूपाचसर्वसंपद्विधायिनी ययाविनाजगत्सर्वंनिराधारंचराच
राचरं ९१ प्रकृतेश्चकलायातानिबोधमुनिरीश्वर यस्ययस्ययायाःपत्न्यस्ताःसर्वाव
र्णयामियते ९२ स्वाहादेवीवह्निपत्नीविश्वलोकेषुपूजिता ययाविनाहविर्दानेनग्र
हीतुंसुराःक्षमाः ९४ दक्षिणायज्ञपत्नीचदीक्षासर्वत्रपूजिता ययाविनाचवि
श्वेषुसर्वकर्मचनिष्फलं ९५ स्वधापितृणांपत्नीचमुनिभिर्मनुभिःनरैः पूजि
तापित्रदानेचनिष्फलंचययाविना ९६ पुष्टिर्गणपतेःपत्नीपूजिताजगतीतले
ययाविनापरिक्षीणाःपुमांसोयोषितोभवेत् ९७ अनंतपत्नीतुष्टिश्चपूजितावंदिता

श्रि १

5

ब्र· प्र· ति· ५

भवेत् ययाविनानसंतुष्टाः सर्वलोकाश्चसर्वतः ९८ ईशानपत्नीसंपत्तिःपूजिताः
चसुरैर्नरैः सर्वल्लोकादरिद्राश्चदरिद्राश्चययाविना ९९ धृतिःकपिलपत्नीचस
र्वैःसर्वत्रपूजिता सर्वलोकाअधैर्याश्चजगत्सुचयया विना १० यमपत्नीक्षमा
साध्वीसुशीलासर्वपूजिता समुन्मत्ताश्चकष्टाःसर्वलोका ययाविना ११ सत्य
पत्नीसतीभक्तिःपूजिताजगतांप्रिया ययाविनाभवेल्लोकोबंधुनारहितःसदा १०२
मोहपत्नीदयासाध्वीपूजिताचजगत्प्रिया क्रीडाधिष्ठात्रदेवीसाकामपत्नीरतिःसती
केलिकौतुकहीनाश्चसर्वलोकाययाविना सर्वलोकाश्चसर्वत्रनिष्ठुराश्चययाविना
१०४ सत्यपत्नीप्रतिष्ठासापुण्यरूपाचपूजिता ययाविनाजगत्सर्वंजीवन्मृतपरं
न्या ५ मते १०५ कर्मपत्नीचकीर्त्तिश्चधन्यामांचपूजिता ययाविनाजगत्सर्वंमृतछिन्नमि
वनारद १०६ अधर्मपत्नीमिथ्यासासर्वैश्चधूर्त्तैश्चपूजिता ययाविनाजगन्नष्टमुच्छि
न्नंविधिनिर्मितं १०७ सत्येअदर्शनायायात्रेतायांसूक्ष्मरूपिणी अर्द्धावयवरूपाच यं३
द्वापरेसंवृतानिभिया १०८ कलौमहाप्रगल्भाचसर्वत्रव्यापिकाबलात् कपटेनस
मंभ्रातॄभ्रमत्येवगृहेगृहे १०९ शांतिर्लज्जाचभार्येद्वेसुशीलस्यचपूजिते याभ्यां ५

5A

विनात्मा सर्वं गृहं भस्मतमं सदा ११० मूर्तिश्च धर्मपत्नी सा कांतिरूपा मनोहरा विरात्मा
च विश्वौघौ निराधारो यया विना १११ सा च शोभा स्वरूपा च लक्ष्मीर्मूर्तिमती सती श्रीरू
पा मूर्तिरूपा च मान्या धन्या प्रपूजिता ११२ कालाग्निरुद्ररूपा च निद्रा सा सिद्धयोगिनी ।
सर्वलोकाः समाछिन्ना यया योगेन रात्रिषु ११३ कालस्य तिस्रो भार्याश्च संध्या रात्रिर्दि
नानि च याभिर्विना विधात्रा च संख्या कर्तुं न शक्यते ११४ क्षुत्पिपासे लोभभार्ये धन्ये
प्रपूजिते कालकन्ये मृत्युजरे प्रज्वरस्य प्रिये प्रिये ११५ याभ्यां जगत्समाछिन्नं विधा
त्रा निर्मितं विभो निद्राकन्ये तंद्रा सा प्रीतिश्च एव सुखप्रिया ११६ यया व्याप्तं जगत्स
र्वं विधिपुत्रा विधेर्विधौ वैराग्यस्य च द्वे भार्ये श्रद्धाभक्तिश्च पूजिते ११७ याभ्यां शश्वज्जगत्स ।
र्वं जीवन्मुक्तमिदं मुने अदितिर्देवमाता च सुरभिश्च गवां प्रसूः ११८ दितिश्च दैत्यजननी
कद्रूश्च विनता दनुः उपयुक्ताः सृष्टिविधौ एताश्च प्रकृतेः कलाः ११९ कलाश्चान्याः
संति बह्व्यस्तासु काश्चिन्निबोध मे रोहिणी चंद्रपत्नी च संज्ञा सूर्यस्य कामिनी १२० शत
रूपा मनोर्भार्या शची इंद्रस्य च गेहिनी तारा बृहस्पतेर्भार्या वसिष्ठस्याप्यरुन्धती १२१
अहल्या गौतमस्त्री साप्यनसूयात्रिकामिनी देवहूती कर्दमस्य प्रसूतिर्दक्षकामिनी १२२

परे

6

ब्र॰प्र॰ ति॰ ६

पितॄणामानसीकन्यामेनकासांविकाप्रसूः लोपामुद्रातथाहूतिः कुवेरस्यचकामिनी
१२३ वरुणानियमस्त्रीचवलेर्विंध्यावलीतथा कुंतीचदमयंतीचयशोदादेवकीसती १२४
गांधारीद्रौपदीशैव्यासावित्रीसत्यवत्प्रिया वृषभानोःप्रियासाध्वीराधामाताकलावती
१२५ मंदोदरीचकौशल्यासुभद्राकैकयीतथा रेवतीसत्यभामाचकालिंदीलक्ष्मणातथा
जांबवतीनाग्नजितीमित्रवृंदातथापरा लक्षणारुक्मिणीसीतास्वयंलक्ष्मीःप्रकीर्तिता १
२६ कलायोजनगंधाचव्यासमातामहासती बाणपुत्रीतथोषाचचित्रलेखाचतत्सखी १
२७ प्रभावतीभानुमतीतथामायावतीसती रेणुकाचभृगोर्माताहलिमाताचरोहिणी १
२८ एकानंशाचदुर्गासाश्रीकृष्णभगिनीसती बह्व्यःसंतिकलाश्चैवप्रकृतेरेवभारते १
२९ याश्चग्रामदेव्यस्ताःसर्वाःप्रकृतेःकलाः कलांशांशसमुद्भूताःप्रतिविश्वे
षुयोषितः १३० योषितामपमानेनप्रकृतेश्चपराभवः ब्राह्मणीपूजितायेनपतिपुत्र
वतीसती १३१ प्रकृतिःपूजितातेनवस्त्रालंकारचंदनैः कुमारीचाष्टवर्षीयावस्त्रा
लंकारचंदनैः २३२ पूजितायेनविप्रस्यप्रकृतिस्तेनपूजिता सर्वाःप्रकृतिसंभूताउत्तमा
धममध्यमाः २३३ सत्वांशाश्चोत्तमाज्ञेयाःसुशीलाश्चपतिव्रताः मध्यमाराजसाश्चा ६

6A

शास्ताश्च भोग्याः प्रकीर्तिताः १३४ स्वत्वसंभोगवश्याश्च स्वकार्यतत्पराः सदा अधमा
स्ता मम स्वांशांशांशाश्च ताः कुलसंभवाः १३५ दुर्मुखाः कुलटा धूर्ताः स्वतंत्राः कलहप्रियाः
पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः १३६ प्रकृतेस्तमसश्चांशाः पुंश्चल्यः परि
कीर्तिताः एवं निगदितं सर्वं प्रकृतेः परिकीर्तनम् १३७ ताः सर्वाः पूजिताः पृथ्व्यां पुण्य
क्षेत्रे च भारते पूजिताः सुरथेनादौ दुर्गा दुर्गतिनाशिनी १३८ द्वितीये रामचंद्रेण राव
णस्य वधार्थिना तत्पश्चाज्जगतां माता त्रिषु लोकेषु पूजिता १३९ यानादौ दक्षपत्न्यां
निहत्य दैत्यदानवान् ततो देहं परित्यज्य यज्ञे भर्तुश्च निंदया १४० जज्ञे हिमवतः पत्न्यां
लेभे पशुपतिं पतिं गणेशश्च स्वयं विष्णुः स्कंदो विष्णुकलाभवः १४१ बभूवतुस्तौ तनयौ
तौ पश्चात्तस्याश्च नारद लक्ष्मीर्मंगलभूपेन प्रथमे पूजिता शुभा १४२ त्रिषु लोकेषु तत्पश्चा
द्देवतामुनिपुंगवे आदौ सरस्वती देवी ब्रह्मणा परिपूजिता १४३ तत्पश्चात्त्रिषु लोके
षु देवतामुनिमानवैः प्रथमे पूजिता राधा गोलोके रासमंडले १४४ पौर्णमास्यां का
र्तिकस्य कृष्णेन परमात्मना गोपिकाभिश्च गोपैश्च बालिकाभिश्च बालकैः १४५ गवांग
णैः सुरभ्या च तत्पश्चादाज्ञया च हरेः तदा ब्रह्मादिदेवैश्च मुनिभिर्मनुभिस्तथा १४६

7 ब्रं: प्र ति ७

पुष्पधूपादिभिर्भक्त्या पूजिता वंदिता सदा पृथिव्यां प्रथमे देवी सुयज्ञेनैव पूजिता १४७
शंकरेणोपदिष्टेन पुण्ये क्षेत्रे च भारते त्रिषु लोकेषु तत्पश्चादाज्ञया परमात्मनः १४८
पुष्पधूपादिभिर्भक्त्या पूजिता मुनिभिः सुरैः कलया या याः समुद्भूताः पूजितास्ताश्च भा
रते १४९ पूजिता ग्रामदेवत्यो ग्रामे च नगरे वने एतत्ते कथितं सर्वं प्रकृतेश्चरितं शुभं
१५० यथागमं लक्षणं च किं भूयः श्रोतुमिच्छसि १५१ इति श्रीब्रह्मवैवर्ते महापुराणे प्रकृ
तिखंडे नारायणनारदसंवादे प्रकृतिचरितसूत्रं नामानुक्रमिकाः प्रथमोऽध्यायः १ नार
द उवाच समासेन श्रुतं सर्वं देवीनां चरितं विभो विबोधनाय बोधस्य व्यासेन वक्तुमर्हसि १
सृष्टेराद्या सृष्टिविधौ कथमाविर्बभूव ह कथं वा पंचधा भूता वद वेदविदांवर २
भूता या या च कलया तया त्रिगुणया भवन् व्यासेन तासां चरितं श्रोतुमिच्छामि सांप्रतं
३ तासां जन्मानुकथितं ध्यानं पूजाविधिं बुध स्तोत्रं कवचमैश्वर्यं शौर्यं वर्णय मंगलं ४ शेषय ७
श्रीनारायण उवाच नित्यात्मा च नभो नित्यं कालो नित्यो दिशो यथा विश्वानां गोलकं
नित्यं नित्यो गोलोक एव च ५ तदेकदेशो वैकुंठो नम्रभागः स नित्यकः तथैव प्रकृति
र्नित्या ब्रह्मलीला सनातनी ६ यथाग्नौ दाहिका चंद्रे पद्मे शोभा प्रभा रवौ शश्वन्न ७

7A

त्मात्मभिन्नासातस्मात्प्रकृतिरात्मनि ७ विनास्वर्णंस्वर्णकारः कुंडलंकर्तुमक्षमः ।
विनामृदंघटंकर्तुंकुलालोपिनहीश्वरः ८ नहिक्षमस्तथात्माचसृष्टिंकर्तुंतयाविना
सर्वशक्तिस्वरूपासासतयाशक्तिमान्सदाः ९ ऐश्वर्यवाचकःशक्तिपराक्रमस्यवा।
चकः तत्स्वरूपातयोर्दात्रीयासाशक्तिः प्रकीर्तिता १० समृद्धिबुद्धिसंपत्तियशसांव
चनोभगः तेनशक्तिर्भगवतीभगरूपाचसर्वदा ११ तयायुक्तः सदात्माचभगवांस्तेन
कथ्यते सचस्वेच्छामयःकृष्णः साकारश्चनिराकृतिः १२ तेजोरूपंनिराकारंध्यायंते
योगिनः सदा वदंतितेपरंब्रह्मपरमात्मानमीश्वरं १३ अदृश्यंसर्वद्रष्टारंसर्वज्ञंस
र्वकारणं सर्वदंसर्वरूपंतमद्रूपंसर्वपोषकं १४ वैष्णवास्तन्नमन्यानतद्भक्ताः सूक्ष्मद
र्शिनः वदंतीतिकस्यतेजस्तेचतेजस्विनोविना १५ तेजोमंडलमध्यस्थंब्रह्मतेजस्वि।
नंपरं स्वेच्छामयंसर्वरूपंसर्वकारणकारणं १६ अतीवसुंदरंरूपंविभ्रतंसुमनोहरं
किशोरवयसंशांतंसर्वकांतंपरात्परं १७ नवीननीरदश्यामंरासैकश्यामविग्रहम्
शरन्मध्याह्नपद्मौघशोभामोचनलोचनं १८ मुक्तासारविनिंदैकदंतपंक्तिमनोहरं
मयूरपुच्छचूडंचमालत्यंमंडितं १९ सुनसंसस्मितंशश्वद्भक्तानुग्रहविग्रहं ज्वलदा

त्वेषादि१

8

ब्र·वै· ग्निविशुद्धैकपीतांशुकविभूषितं १९ द्विभुजं मुरलीहस्तं रत्नभूषणभूषितं सर्वाधारं च
प्र·ति· सर्वेशं सर्वशक्तियुतं विभुं २० सर्वैश्वर्यप्रदं सर्वं स्वतंत्रं सर्वमंगलं परिपूर्णतमं सिद्धं सिद्धिका
८ रणकारणं २१ ध्यायंते वैष्णवाः शश्वद्देवं रूपं सनातनं सर्वैश्वर्यप्रदं सर्वं स्वतंत्रं सर्वमंगलं
ल०८ जन्ममृत्युजराव्याधिशोकभीतिहरं परं ब्रह्मणो वयसा यस्य निमेष उपचर्यते २३ स चात्मा मेर
परंब्रह्म कृष्ण इत्यभिधीयते कृषस्तद्भक्तिवचनो णश्च दास्यवाचकः भक्तिदास्यप्रदा
तायस्तस्मात्स परिकीर्तितः २४ कृषश्च सर्ववर्णो वै नकारो बीजवाचकः यद्दृक्षानोनास्ति
नाशस्तत्समानश्गुणोनच २५ स कृष्णः सर्वस्रष्टादौ सिसृक्षन्नेक एव च सृष्ट्युन्मुखस्तदं
शेन कालेन प्रेरितः प्रभुः २६ स्वेच्छामयः स्वेच्छया च द्विधारूपो बभूव ह स्त्रीरूपा वामभा
गांशाद्दक्षिणांशः पुमान्स्मृतः तां ददर्श महाकामी कामाधारः सनातनः अतीव कमनीयां च
चारुचंपकसन्निभां २८ चंद्रबिंबविनिंदैकनितंबयुगलां परां कस्तूरीबिंदुभिः सार्द्धमधु
श्चंदनबिंदुना २९ समं सिंदूरबिंदुं च भालमध्ये च बिभ्रतीं विभ्रती कवरीभारं मालतीमाल्य
भूषितं ३० रत्नेन्द्रसारहारं च दधतीं कांतकामुकीं कोटिचंद्रप्रभाजुष्टपुष्टशोभासमन्वितां
३१ गमनेन राजहंसगतगंजनगंजनी दृष्ट्वा तां तु तया सार्द्धं रासेशो रासमंडले ३२ ८

8A

रासोल्लासेषुरहसिरासक्रीडांचकारसः नानाप्रकारशृंगारंशृंगारोमूर्तिमानिव ३३ च
कारसुखसंभोगंयावद्वैब्रह्मणोवयः ततःसचपरिश्रांतस्तस्यायोनौजगत्पिता ३४ च
कारवीर्याधानंचनित्यानंदःशुभक्षणे गात्रतोयोषितस्तस्याः सुरतांतेचसुव्रतः ३५
निःससारश्रमजलंतत्सर्वंविश्वगोलकं सचनिश्वासवातश्चसर्वाधारोवभूवह ३६ निः
श्वासवायुःसर्वेषांजीविनांचेतरेषुच वभूवमूर्तिमान्वायोर्वामांगात्प्राणवल्लभा ३७
तत्पत्नीसाचतत्पुत्राःप्राणाःपंचजीविनां प्राणापानसमानश्चोदानोव्यानसएवच ३८
वभूवुरेवतत्पुत्राअधःप्राणश्चपंचमः घर्मतोयादिदेवश्चवभूववरुणोमहान् ३९ त
द्वामांगाच्चतत्पत्नीवारुणीसवभूवसा अथसाकृष्णशक्तिश्चकृष्णगर्भंदधारच ४० शत
मन्वंतरंयावद्दध्यतीब्रह्मतेजसा कृष्णप्राणाधिदेवीसाकृष्णप्राणाधिकाप्रिया ४१ कृष्ण
स्यसंगिनीशश्वत्कृष्णवक्षःस्थलस्थिता शतमन्वंतरातीतेकालेतीतेपिसुंदरी ४२
ससारितंचस्वर्णाभंविश्वाधारालयंपरं दृष्ट्वाडिंभंचसादेवीहृदयेनविदूयता ४३ उत्स
सर्जचकोपेनब्रह्मांडगोलकंजले दृष्ट्वाकृष्णश्चतत्त्यागंहाहाकारंचकारसः ४४ पपात
दंस्वरूपाश्चभविष्यंतिसुराःस्त्रियः अनपत्याश्चताःसर्वास्त्वत्समानित्ययौवनाः ४५ पा

१

ब्र॰ प्र॰ नि॰ ९

तस्मिन्नंतरेदेवीजिह्वाग्रात्सहसाततः आविर्बभूवकन्यैकाशुक्लवर्णामनोहरा ४६
पीतवस्त्रपरीधानावीणापुस्तकधारिणी रत्नभूषणभूषाढ्यासर्वशास्त्राधिदेवता ४७
अथकालांतरेसाचद्विधारूपाबभूवह वामार्धांगाच्चकमलादक्षिणार्धाच्चराधिका ४८
एतस्मिन्नंतरेकृष्णोद्विधारूपोबभूवह एवंलक्ष्मींचप्रददौतुष्टोनारायणायच ४९
सजगामचवैकुंठंताभ्यांसार्धंजगत्पतिः अनपत्येचतेद्वेचयतोराधांशसंभवा ५० भू
तानारायणांगाच्चपार्षदाश्चचतुर्भुजाः तेजसावयसारूपगुणाभ्यांचसमाहरेः ५१ ब
भूवुः कमलांगाच्चदासीकोट्यश्चतत्समाः अथगोलोकनाथस्यलोम्नांविवरतोमुने
५२ भूताश्चासंख्यगोपाश्चवयसातेजसासमा गुणेनचबलेनैववेषेणविक्रमेणच ५३
प्राणतुल्यप्रियाः सर्वेबभूवुःपार्षदाविभोः राधांगरोमकूपेभ्योबभूवुर्गोपकन्यकाः
राधातुल्याश्चसर्वास्ताराधादास्याः प्रियाः सदा रत्न[illegible]भूषणभूषाढ्याः सशश्व
त्स्थिरयौवनाः ५५ अनपत्याश्चताः सर्वाः पुंसः शापेनसंततं एतस्मिन्नंतरेविप्रसह
साकृष्णदेहतः ५६ आविर्बभूवसादुर्गाविष्णुमायासनातनी देवीनारायणीशानास
र्वशक्तिस्वरूपिणी ५७ बुद्ध्यधिष्ठात्रदेवीसाकृष्णस्यपरमात्मनः देवीनांबीजरूपाच

९

9A

मूलप्रकृतिरीश्वरी ५८ परिपूर्णतमातेजःस्वरूपात्रिगुणात्मिका तप्तकांचनवर्णा
भासूर्यकोटिसमप्रभा ५९ वह्निशुद्धांशुकाधानारत्नभूषणभूषिता यस्याश्चांशांश
कलयाबभूवुः सर्वयोषिताः ६० ईषद्धास्यप्रसन्नास्यासहस्रभुजसंयुता नानाशस्त्रास्त्र-
निकरंबिभ्रतीसात्रिलोचना ६१ सर्वविश्वस्थितालोकामोहितायस्यमायया सर्वैश्वर्य-
प्रदात्रीचवैष्णवानांचवैष्णवी ६२ मुमुक्षूणांमोक्षदात्रीसुखिनांसुखदायिनी स्वर्गेषुस्वर्ग-
लक्ष्मीश्चगृहलक्ष्मीर्गृहेगृहे ६३ तपस्विषुतपस्याचश्रीरूपामंडपेषुच यावह्नौदाहिका
शक्तिःप्रभारूपाचभास्करे ६४ शोभारूपाचचंद्रेचपद्मेषुचशोभना सर्वशक्तिस्वरूपा-
याश्रीकृष्णेपरमात्मने ६५ ययाचशक्तिमानात्माययाचशक्तिमज्जगत् ययाविनाजगत्स
र्वंजीवन्मृतमिवस्थितम् ६६ याचसंसारवृक्षस्यबीजरूपासनातनी स्थितिरूपावृद्धिरूपा
फलरूपाचनारद ६७ क्षुत्पिपासादयाश्रद्धानिद्रातंद्राक्षमाधृतिः शांतिर्लज्जातुष्टिपुष्टी
भ्रांतिःकांत्यादिरूपिणी ६८ साचसंस्तूयसर्वेशंतत्पुरःसमुवासह रत्नसिंहासनंतस्मैप्र
ददौराधिकेश्वरः ६९ एतस्मिन्नंतरेतत्रतपसीज्ञानिनांवरः चतुर्मुखस्त्वत्तनिष्ठावप्रज्वला-
ज्वलितेनसा ७० सुंदरीसुंदरीश्रेष्ठाशतचंद्रसमप्रभा वह्निशौचांशुकाधानारत्नभूष-

10

ब्र॰ णभूषिता २१ रत्नसिंहासनेरम्येसंस्तूयसर्वकारणं तेवासन्स्वामिनासार्धंकृष्णस्यपुरतो
प्र॰ खं मुदा २२ एतस्मिन्नंतरेकृष्णोद्विरूपोबभूवसः वामार्धांगोमहादेवोदक्षिणेगोपिकापतिः
१० २३ शुद्धस्फटिकसंकाशः सस्मितश्चंद्रशेखरः दिगंबरोनीलकंठः सर्वभूषणभूषितः
२४ बिभ्रद्दक्षिणहस्तेनरत्नमालांसुसंस्कृतां प्रजपन्पंचवक्त्रेणब्रह्मज्योतिः सनातनं
२५ जपस्वरूपंश्रीकृष्णंपरमात्मानमीश्वरं कारणंकारणानांचसर्वमंगलमंगलम् २६
जन्ममृत्युजराव्याधिशोकभीतिहरंपरं संस्तूयमृत्योर्मृत्युंतंयतोमृत्युंजयाभिधः २७
रत्नसिंहासनेरम्येसमुवासहरेः पुरः २८ इतिश्रीब्रह्मवैवर्तेमहापुराणेनारायणना
रदसंवादेप्रकृतिखंडेदेवोत्पत्तिर्नामद्वितीयोध्यायः २ श्रीनारायणउवाच अथडिंबोज
प५ लेतिष्ठावद्वैब्रह्मणोवयः ततः सकालेसहसाद्विधाभूतोबभूवसः १ तन्मध्येशिशुरे
कश्चशतकोटिरविप्रभः क्षणंरोदमानश्चस्तनार्थंपीडितः क्षुधा २ पितृमातृपरित्य
क्तोजलमध्येनिराश्रयः ब्रह्मांडासंख्यनाथोयोददर्शोर्ध्वमनाथवत् ३ स्थूलात्स्थूलत
मः सोपिनाम्नादेवोमहाविराट् परमाणुर्यथासूक्ष्मात्परःस्थूलात्तथाप्यसौ ४ तेज
सोषोडशांशोयंश्रीकृष्णस्यपरमात्मनः आधारोसंख्यविश्वानांमहाविष्णुः प्रकीर्तितः ५ ९

10A प्रत्येकंरोमकूपेषुविश्वान्यप्यखिलानिच अस्यापितेषांसंख्याचकृत्स्नोवक्तुंनहिक्षमः ६
संख्याचेद्रजसामस्तिविश्वानांनकदाचन ब्रह्मविष्णुशिवादीनांतथासंख्यानविद्यते ७
प्रतिविश्वेषुसंत्येवंब्रह्मविष्णुशिवादयः पातालाद्ब्रह्मलोकांतंब्रह्मांडंपरिकीर्त्तितं ८
ततऊर्ध्वंचवैकुंठोब्रह्मांडाद्बहिरेवसः सचसत्यस्वरूपश्चशश्वन्नारायणोयथा ९ अतऊ
र्ध्वंचगोलोकःपंचाशत्कोटियोजनात् नित्यंसत्यस्वरूपश्चयथाकृष्णस्तथाप्ययं १० सप्त
द्वीपवतीपृथ्वीसप्तसागरसंयुता ऊनपंचाशदुपद्वीपसंख्याशैलवनान्विता ११ ऊर्ध्वंसप्त
स्वर्गलोकाब्रह्मलोकसमन्विताः पातालानिचसप्ताधश्चैवंब्रह्मांडमेवच १२ ऊर्ध्वंधराया
भूर्लोकोभुवोलोकस्ततःपरः ततःपरश्चस्वर्लोकोजनलोकस्ततःपरः १३ ततःपरस्त
पोलोकःसत्यलोकस्ततःपरः ततःपरोब्रह्मलोकस्तप्तकांचननिर्मितः १४ एवंसर्वंकृ
त्रिमंचबाह्याभ्यंतरमेवच तद्विनाशेविनाशश्चसर्वेषामेवनारद १५ जलबुद्बुदवत्सर्वंविश्व
संघमनित्यकं एषांसंख्यांनजानातिकृष्णोन्यस्यापिकाकथा १६ प्रत्येकंप्रतिब्रह्मांडेविष्णु ब्रह्म
शिवादयः तिस्रःकोट्यःसुराणांचसंख्यासर्वत्रपुत्रक १७ दिगीशाश्चैवदिक्पालानक्ष
त्राणिग्रहादयः भुविवर्णाश्चचत्वारोह्यधोनागाश्चराचराः १८ अथकालेचगोरीरुः

सोंतरधीयत गत्वास्वलोकंब्रह्माणंशंकरंसउवाचह ४४ स्रष्टारंसृष्टमीशंचसंहर्त्ता
ब्र.श्री. रमापितत्क्षणं श्रीकृष्णउवाच सृष्टिंस्रष्टुंगच्छवत्सनाभिपद्मोद्भवोद्भव ४५ महाविरा
ति.खं. ड्लोमकूपेवत्सक्षुद्रस्यचविधेशृणु गच्छवत्समहादेवब्रह्मभालोद्भवोद्भव ४६ अंशे
१२ नचमहाभागस्वांशेनसुचिरंतपः इत्युक्त्वाजगतांनाथोविररामविधेःसुत ४७ जगा
मब्रह्मानत्वाशिवश्चशिवदायकः महाविराड्लोमकूपेब्रह्मांडगोलकेजले ४८
वभूवचक्षुद्रविराडंशेनस्वांशतंमुने श्यामोयुवापीतवासाःशयानोजलईश्वरः ४९
ईषद्धास्यप्रसन्नास्योविश्वव्यापीजनार्दनः तन्नाभिकमलेब्रह्माबभूवकमलोद्भवः ५०
संभूयपद्मदंडेचवभ्रामयुगलक्षकं नांतंजगामदंडस्यपद्मनाभस्यपद्मतः ५१ ना
भिजस्यचपद्मस्यचिंतामापपितामहः स्वस्थानंपुनरागम्यदध्यौविष्णुपदांबुजं ५२ ततोद
दर्शक्षुद्रंतंध्यानेनदिव्यचक्षुषा शयानंजलतल्पेचब्रह्मांडगोलकावृते ५३ यल्लोमकू
पेब्रह्मांडंतंचतत्परमेश्वरं श्रीकृष्णंचापिगोलोकंगोपगोपीसमन्वितं ५४ तंसंस्तूयवरंप्राप
ततःसृष्टिंचकारसः बभूवुर्ब्रह्मणःपुत्रामानवाःसनकादयः ५५ ततोरुद्राःकपाला
द्वशिवांशेकादशस्मृताः बभूवपाताविष्णुश्चक्षुद्रस्यवामपार्श्वतः ५६ चतुर्भुजश्चभगवा १२

12A

श्वेतद्वीपनिवासकृत् त्वद्रसनाभिपद्मेच ब्रह्मविश्वं ससर्ज ह ५७ स्वर्गमर्त्यंचपातालं त्रिलोकं
सचराचरं एवं तस्य रोमकूपे विश्वं प्रत्येकमेवच ५८ प्रतिविश्वेत्वद्रविराट्ब्रह्मविष्णुशिवादयः
इत्येवं कथितं वत्स कृष्णसंकीर्तनंशुभं ५९ सुखदंमोक्षदंसारं किंभूयः श्रोतुमिच्छसि ६० इ
तिश्रीब्रह्मवैवर्ते महापुराणे प्रकृतिखंडे नारायणनारदसंवादे विश्वनिर्णयं नाम तृतीयोध्यायः ३ ॥
नारद उवाच श्रुतंसर्वमपूर्वंचत्वत्प्रसादात्सुरोत्तम अधुनाप्रकृतीनांच व्यासं वर्णयपूजनं १ कस्याः
पूजाकेनकृता कथंमर्त्ये प्रचारिता केनवापूजिताकामाकेनकावास्तुतामुने २ कवचंस्तोत्रंध्या
नंचप्रभावंचरितंशुभं काभिःकाभ्यो वरोदत्तस्तन्मेव्याख्यातुमर्हसि ३ श्रीनारायण उवाच
गणेशजननी दुर्गाराधालक्ष्मीः सरस्वती सावित्री च सृष्टिविधौ प्रकृतिः पंचधास्मृता ४ आसांपूजा
प्रसिद्धाचप्रभावः परमाद्भुतः सुधोपमंचचरितंसर्वमंगलकारकं ५ प्रकृत्यंशाः कलायाश्च
तासांचचरितंशुभं सर्वंवक्ष्यामितेब्रह्मन्सावधानंनिशामय ६ कालीवसुंधरागंगाषष्ठी
मंगलचंडिका तुलसीमनसानिद्रास्वधास्वाहाचदक्षिणा ७ संक्षेपतासांचरितंपुण्य
दंश्रुतिसुंदरं जीवकर्मविपाकेनतच्चवक्ष्यामिसुंदर ८ दुर्गायाश्चैवराधायाविस्तीर्णंचरि
तंमहत् तत्पश्चात्प्रवक्ष्यामिसंक्षेपक्रमतःश्रृणु ९ आदौसरस्वतीपूजाश्रीकृष्णेनविनि

13

ब्र॰वै॰ र्मिता यत्प्रसादान्मुनिश्रेष्ठ मूर्खो भवति पंडितः १० आविर्भूता यथा देवी क्रमतः कृष्णयोषितः
प्र॰खं॰ इयेष कृष्णं कामेन कामुकी कामरूपिणी ११ स च विज्ञाय तद्भावं सर्वज्ञः सर्वमातरम् ताम्
१३ वाच हितं सत्यं परिणाम सुखावहम् १२ श्रीकृष्ण उवाच भज नारायणं साधुं मदंशं तं चतु
र्भुजं युवानं सुंदरं सर्वगुणयुक्तं च मत्समं १३ कामुकं कामिनीनां च तासां च कामपूरकं ।
कोटिकंदर्पलावण्यं लीलालंकृतमीश्वरं १४ कांतिकांतं च मां कृत्वा यदि स्थातुमिहेच्छसि
मत्तो बलवती राधा न ते भद्रं भविष्यति १५ यो यस्माद्बलवान्वापि ततोऽन्यं रक्षितुं क्षमः कथं
परान्साधयति यदि स्वयमनीश्वरः १६ सर्वेशः सर्वशास्ताहं राधां बाधितुमक्षमः तेजसा
मत्समा सा च रूपेण च गुणेन च १७ प्राणाधिष्ठातृदेवी सा प्राणांस्त्यक्तुं च कः क्षमः प्राणा ३८
तोपि प्रियः पुत्र केषां वास्ति कुत्रचन १८ त्वं भद्रे गच्छ वैकुंठं तत्र ते भद्रं भविष्यति पतिं तमी
श्वरं कृत्वा मोदस्व सुचिरं सुखं १९ लोभमोहकामकोपमानहिंसाविवर्जिता तेजसा
त्वत्समा लक्ष्मी रूपेण च गुणेन च २० तया सार्द्धं तव प्रीत्या गच्छत्कालं प्रयास्यति गौरवं सम
वातुल्यं करिष्यति पतिर्द्वयोः २१ प्रतिविश्वेषु ते पूजां महतीं ते मुदान्विताः माघस्य शुक्लपं
चम्यां विद्यारंभे च सुंदरि २२ मानवा मनवो देवा मुनीन्द्राश्च मुमुक्षवः संतश्च योगिनः सिद्धा १३

13A

नागगंधर्वरात्तसाः २३ मह्वरणोकरिष्यंतिकल्पेकल्पेलयावधि भक्तियुक्ताश्चदत्ता
वैचोपचोरगणाश्चोरगा २४ कामशापोक्तविधिनाध्यानेनस्तवनेनच जितेंद्रियाः संयु
ताश्चचदेवपुस्तकेपिच कृत्वास्ववर्णागरिकागंधचंदनचर्चिता कवचंतेगदेहोष्यंतिकु
ठेवादृविणोभजे पठिष्यंतिचविद्वांसः स्नानकालेचष्टजिते इत्युक्त्वापूजयामासतोदेवीं
सर्वदेवैजितः २७ ततस्तस्त्वनचक्रुर्ब्रह्मविष्णुमहेश्वराः अनंतश्चापिधर्मश्चमनवःस
नकादयः २८ सर्वदेवामनवोमुनींद्रामानवादयः वभूवमानवानित्यासर्वलोकेसर
स्वती २९ नारदउवाच पूजाविधानंस्तवनंध्यानंकवचमीप्सितम् पूजोपयुक्तनैवेद्यं
पुष्पंचचंदनादिकं ३० वदवेदविदांश्रेष्ठश्रोतुंकौतूहलंमम वर्द्धतेसांप्रतंशश्वत्किमि
दंश्रुतिसुंदरं ३१ श्रीनारायणउवाच शृणुनारदवक्ष्यामिविद्यारंभदिनेपिच पूर्वेद्यु
ममयंकृत्वातत्राक्तिसंयुतः शुचिः ३२ स्नात्वानित्यक्रियांकृत्वाघटंसंस्थाप्यभक्तितः
संपूज्यदेवषट्कंवनैवेद्यादिभिरेवच ३३ गणेशंचदिनेशंचवह्निंविष्णुंशिवंशिवां संपूज्य
संयतोग्रेनततोभीष्टंप्रपूजयेत् ३४ ध्यानेनवक्ष्यमाणेनध्यात्वावाताह्यदेवुयः ध्यात्वा
पुनःषोडशोपचारेणपूजयेत्सती ३५ पूजोपयुक्तनैवेद्यंयद्यद्वेदेनिरूपितं वक्ष्यामिसां।

14

ब्र·वै· मतंकिंचिद्यथागीतंयथागमं ३६ नवनीतंदधिक्षीरंलाजंचतिललड्डुकं इक्षुमिक्षुरसंचैवशु
प्र·खं· क्लधान्यस्यमोदकं ३७ घृतसैंधवसंस्कारैर्हविष्यान्नंचव्यंजनैः यवगोधूमचूर्णानांपिष्टकंघृ
१५ तसंस्कृतं ३८ पिष्टकंस्वस्तिकस्यापिपक्वरंभाफलस्यच परमान्नंचसघृतंमिष्टान्नंचसुधोपमं
३९ नारिकेलंतदुदकंकेसरंमूलमार्द्रकम् पक्वरम्भाफलंचाम्रश्रीफलंवदरीफलं काल
देशोद्भवंपक्वफलंशुक्लाससंस्कृतं सुगंधिशुक्लपुष्पंचसुगंधिशुक्लचंदनं ४१ नवीनं
शुक्लवस्त्रंचसिंधूरंसुंदरंमने माल्यंचशुक्लपुष्पानांशुक्लहारंचभूषणं ४२ यदृष्टंचश्रु
तौध्यानंप्रशस्यंश्रुतिसुंदरं तन्निबोधमहाभागभ्रमभंजनकारणं ४३ सरस्वतींशुक्ल
वर्णांसुस्मितांसुमनोहरां चंद्रकोटिप्रभाजुष्टपुष्टश्रीयुक्तविग्रहाम् ४४ वह्निशुद्धांशु
काधानांसस्मितांसुमनोहरां रत्नसारेंद्रनिर्माणवरभूषणभूषितां सुपूजितांसुरगणै
र्ब्रह्मविष्णुशिवादिभिः वंदेभक्त्यावंदितांतांमुनींद्रमनुमानवैः ४६ एवंध्यात्वाचमूले
नसर्वंदत्वाविचक्षणः संस्तूयकवचंधृत्वाप्रणमेदंडवद्भुवि ४७ येषांचैवमिष्टदेवीते
षांनित्यक्रियामुने विद्यारंभेचवर्षांतेसर्वेषांपंचमीदिने ४८ सर्वोपयुक्तमूलंचवैदिका
ष्टाक्षरंपरं येषांयेनोपदेशंवातेषांसमूलएवच ४९ सरस्वतीचतुर्थ्यंतावह्निजायांतएवच १५

14A

सरस्वती चतुर्थ्यंता वह्निजायांतएवच लक्ष्मीमायादिकं चैव मंत्रोयं कल्पपादपः पुरानारायणे
नैव वाल्मिकाय कृपानिधिः प्रदत्तो ज्ञानदवीतीरे पुण्यक्षेत्रे च भारते ५१ भृगुर्दत्तोच शुक्राय पुष्क
रे सूर्यपर्वणि चंद्रपर्वणि मारीचो दत्तो वाक्पतये मुदा ५२ भृगवे तद्ददौ तुष्टो ब्रह्मा बदरिका
श्रमे आस्तिकस्य जरत्कारुर्ददौ क्षीरोदसन्निधौ ५३ विभांडको ददौ मेरौ ऋष्यशृंगाय धीम
ते शिवा कणादश्रुत्वाय गौतमाय ददौ मुदा ५४ सूर्यश्च याज्ञवल्क्याय तथा कात्यायनायच
शेषः पाणिनये चैव भारद्वाजाय धीमते ५५ प्रददौ शाकटायनाय सुतले बलिसंसदि चतुर्ल
क्षजपेनैव मंत्रः सिद्धो भवेन्नृणां ५६ यदि स्यात्सिद्धमंत्रो हि बृहस्पतिसमो भवेत् कवचं श्रु
णु विप्रेंद्र यद्दत्तं विधिना पुरा ५७ विश्वस्रष्टुं विजने यं भृगवे गंधमादने भृगुरुवाच ब्रह्म
न्ब्रह्मविदां श्रेष्ठ ब्रह्मज्ञानविदांवर ५८ सर्वज्ञ सर्वजनक सर्वेशः सर्वपूजित सरस्वत्याश्च कव
चं ब्रूहि विश्वजयं प्रभो ५९ अयातयाममंत्राणां समूहं संयुतं परं ब्रह्मोवाच श्रृणु वत्स प्र
वक्ष्यामि कवचं सर्वकामदं ६० श्रुतिसारं श्रुतिसुखं श्रुत्युक्तं श्रुतिपूजितं उक्तं कृष्णे
न गोलोके वृंदावने वने ६१ रासेश्वरेण विभुना रासे वै रासमंडले अतीव गोपनीयं च
कल्पवृक्षसमं परं ६२ अश्रुताद्भुतमंत्राणां समूहैश्च समन्वितं यस्याधारणाद्ब्रह्मन्

15

वृहि मांस्थूलहस्पतिः ६३ यद्धृत्वाभगवान्शुक्रः सर्वदैत्येषुपूजिताः कणादोगौतमःकण्वः
ब्र·वै· पाणिनिःशाकटायनः ६४ ग्रंथंचकारयद्धृत्वादक्षःकात्यायनःस्वयं धृत्वावेदविभागंचपु॥
प्र·खं· राणान्यखिलानिच ६५ चकारलीलामात्रेणकृष्णद्वैपायनःस्वयं शातातपश्चसंवर्तोवसि
१५ ष्ठश्चपराशरः ६६ यद्धृत्वापठनाद्ग्रंथंयाज्ञवल्क्यश्चकारसः ऋष्यशृंगोभरद्वाजश्चा॥
स्तीकोदेवलस्तथा ६७ जैगीषव्योथजाबालिर्यद्धृत्वासर्वपूजिताः कवचस्यास्यविप्रेंद्रऋ
षिरेवप्रजापतिः ६८ स्वयंछंदश्चबृहतीदेवोरासेश्वरोविभुः सर्वतत्वपरिज्ञानसर्वार्थसा
धनेषुच ६९ कवितासुचसर्वासुविनियोगःप्रकीर्तितः श्रींह्रींसरस्वत्यैशिरोमेपातुस
र्वतः ७० श्रींवाग्देवतायैस्वाहाभालंमेसर्वदावतु ह्रींश्रींवाग्वादिन्यैस्वाहानासांमेसर्वदा
वतुः ७१ ह्रींविद्याधिष्ठातृदेव्यैस्वाहाचोष्ठंसदावतु ॐह्रींश्रींब्राह्म्यैस्वाहाचदंतपंक्तिसदा
वतु ७२ ह्रींमित्येकाक्षरोमंत्रोममकंठंसदावतु ॐह्रींश्रींपातुमेग्रीवांस्कंधौमेश्रींसदाव
तु ७३ ॐविद्याधिष्ठातृदेव्यैस्वाहावक्षःसदावतु ॐविद्यास्वरूपायैस्वाहावाकु[illegible]स
त्र दावतु ७४ ॐक्लींवाण्यैस्वाहेतिममपृष्ठंसदावतु ॐसर्ववर्णात्मिकायैपादयुग्मंसदावतु
५५ वागधिष्ठातृदेव्यैस्वाहासर्वांगंपरिरदतु सर्वकंठवासिन्यैस्वाहेतिप्राच्यांसदावतु ७६५

15A

ह्रींसाज्जिह्वाग्रवासिन्यैस्वाहाग्नौविदिशिरक्षतु ॐऐंह्रींश्रींसरस्वत्यैबुधजननन्यैस्वाहासततंमं
त्रराजोयंदक्षिणेमांसदावतु ह्रींक्लींश्रींऐंकादक्षरोमंत्रोनैरृत्यांसर्वदावतु ५७ ॐकार्वनौजनि
ह्वाग्रवासिन्यैस्वाहामांवारुणेवतु सदाम्बिकायैस्वाहावायव्येमांसदावतु ५८ ॐगगर्भो
पत्यनिवासिन्यैस्वाहामामुत्तरेवतु ॐसर्वशास्त्रवासिन्यैस्वाहाऐशान्येमांसदावतु ५९
ॐश्रींसर्वपूजितायैस्वाहाचोर्ध्वंसदावतु ॐह्रींपुस्तकवासिन्यैस्वाहाधोमांसदावतु ६०
ॐग्रंथबीजरूपायैस्वाहामांसर्वतोवतु इतितेकथितंविप्रसर्वमंत्रौघविग्रहं ६१ इदंविश्वज
यंनामकवचंविश्वरूपिणां पुराश्रुतंधर्मवक्त्रात्पर्वतेगंधमादने ६२ तवस्नेहान्मयाख्यातंप्र
वक्तव्यंनकस्यचित् गुरुमभ्यर्च्यविधिवद्वस्त्रालंकारचंदनैः ६३ प्रणम्यदंडवद्भूमौकवचं
धारयेत्सुधीः पंचलक्षजपेनैवसिद्धंतुकवचंभवेत् ६४ यस्यादिसिद्धकवचोबृहस्पति
समोभवेत् महावाग्मीकवीन्द्रश्चत्रैलोक्यविजयीभवेत् ६५ सर्गोनिचैतत्सर्वंचकवच
स्यप्रसादतः इदंकाण्वशाखोक्तंकवचंकथितंमुने ६६ स्तोत्रंपूजाविधानंचध्यानंचवंद
नंतथा ६७ इतिश्रीब्रह्मवैवर्त्तेमहापुराणेप्रकृतिखंडेनारायणनारदसंवादेसरस्वतीक
वचंनामचतुर्थोध्यायः ४ नारायणउवाच वाग्देवतायास्तवनंश्रूयतांसर्वकामदं म॥

16

ब्र·वै· महामुनिर्याज्ञवल्क्यो येन तुष्टाव तां पुरा १ गुरुशापाच्च स मुनिर्हतविद्यो बभूव ह तदा जगाम दुः
प्र·खं· खार्तो रविस्थानं च पुण्यदं २ संप्राप्य तपसा सूर्यं लोलार्के दृष्टिगोचरे तुष्टाव सूर्यं शोकेन रुरोद च
६६ मुहुर्मुहुः ३ सूर्यस्तं पाठयामास वेदवेदांगमीश्वरं उवाच स्तौहि वाग्देवीं भक्त्या च स्मृतिहेतवे
४ तमित्युक्त्वा दीननाथो ह्यन्तर्धानं चकार सः मुनिः स्नात्वा च तुष्टाव भक्तिनम्रात्मकंधरः ५
याज्ञवल्क्य उवाच कृपां कुरु जगन्मातर्मामेवं हततेजसं गुरुशापात्स्मृतिभ्रष्टं विद्याहीनं
च दुःखितं ६ ज्ञानं देहि स्मृतिं देहि विद्यां विद्याधिदेवते प्रतिष्ठां कवितां देहि शक्तिं सिष्यप्रबो
धिकां ७ ग्रंथकर्तृत्वशक्तिं च सुशिष्यं सुप्रतिष्ठितं प्रतिभां सत्सभायां च विचारक्षमतां शुभां
भ्र ८ लुप्तं सर्वं दैववशान्नवीभूतं पुनः कुरु यथाङ्कुरं भस्मनि च करोति देवता पुनः ९ ब्र
ह्मस्वरूपा च परमा ज्योतीरूपा सनातनी सर्वविद्याधिदेवी या तस्यै वाण्यै नमो नमः १० यया
विना जगत्सर्वं मूकमुन्मत्तवत्सदा वागधिष्ठातृदेवी या तस्यै वाण्यै नमो नमः ११ य-
या विना जगत्सर्वं शश्वज्जीवन्मृतं परं ज्ञानाधिदेवी या तस्यै सरस्वत्यै नमो नमः १२ हिमचंद
नकुंदेंदुकुमुदांभोजसन्निभा वर्णाधिदेवी या तस्यै चाक्षरायै नमो नमः १३ विसर्गबिं
दुमात्राणां यदधिष्ठानमेव च तदधिष्ठातृदेवी या तस्यै वाण्यै नमो नमः १४ यया विना ६६

16A

त्वं संख्यावान्संख्यां कर्तुं न शक्यते कालसंख्यास्वरूपायां तस्यै देव्यै नमोनमः १५ व्याख्या
स्वरूपायादेवीव्याख्याधिष्ठातृदेवता प्रमासिद्धान्तरूपायां तस्यै देव्यै नमोनमः १६ स्मृतिशा
क्तिर्ज्ञानशक्तिर्बुद्धिशक्तिस्वरूपिणी प्रतिभाकल्पनाशक्तिर्या च तस्यै नमोनमः १७ सन
त्कुमारो ब्रह्माणं ज्ञानं पप्रच्छ तत्र वै बभूव मूकवत्सोपि सिद्धान्तं कर्तुमक्षमः १८ तदाज
गाम भगवानात्मा च कृष्णः परमेश्वरः उवाच सतनेस्तौहि वाणीमिति प्रजापते १९ स च तुष्टाव
तो ब्रह्मा चाज्ञया परमात्मनः चकार तत्प्रसादेन तदा सिद्धान्तमुत्तमं २० यदाप्यनंतं पप्रच्छ ज्ञान
मेकं वसुन्धरा बभूव मूकवत्सोपि सिद्धान्तं कर्तुमक्षमः २१ तदा त्वां स च तुष्टाव संत्रस्तः
कश्यपाज्ञया ततश्चकार सिद्धान्तं निर्मलं भ्रमभंजनं २२ व्यासः पुराणसूत्रं च वाल्मीकं पृष्ट
ते तदा मौनीभूयः स स्मार त्वामेव जगदंबिकां २३ तदा चकार सिद्धान्तं तद्वरेण मुनीश्वरः
संप्राप्य निर्मलं ज्ञानं भ्रमध्वंसकदीपकं पुराणसूत्रं श्रुत्वा स व्यासः कृष्णकलोद्भवः त्वां सिषे
व च दध्यौ च शतवर्षं च पुष्करे २५ तदा त्वत्तो वरं प्राप्य सत्कवीन्द्रो बभूव ह तदा वेदविभागं च पु
राणं च चकार ह २६ यदा महेन्द्रः पप्रच्छ तत्त्वज्ञानं शिवा शिवं क्षणं त्वामेव संचिन्त्य तस्मै ज्ञा
नं ददौ विभुः २७ पप्रच्छ शब्दशास्त्रं च महेन्द्रश्च बृहस्पतिं दिव्यं वर्षसहस्रं च स त्वां दध्यौ च

17

ब्र·वै· गुरवे ३८ तदात्वत्तोवरंप्राप्यदिव्यंवर्षसहस्रकं उवाचशास्त्रसारांश्चवदंतंयंचसद्देश्वरम् ३९
प्र·ख· अध्यापिताश्चयैःशिष्यैयेनाधीतंसदीश्वरैः तेचत्वांपरिसंचिन्त्यप्रवर्त्तंतस्सुरेश्वरि ४० त्वंसंस्तुता
९ पूजिताचमुनींद्रमनुमानवैः दैत्यैंद्रैश्चसुरैश्चापिब्रह्मविष्णुशिवादिभिः ४१ जडीभूतःसहस्रास्यःपंचवक्त्रश्चतुर्मुखः यांस्तोतुंकिमहंस्तौमितामेकास्येनमानुषः ४२ इत्युक्त्वाया
ज्ञवल्क्यश्चभक्तिनम्रात्मकंधरः प्रणनाममनिराहारोरुरोदचमुहुर्मुहुः ४३ तदाज्योतिःस्वरू
पासातेनदृष्टाप्युवाचतं सुकवींद्रोभवेत्युक्त्वावैकुंठंचजगामह ४४ याज्ञवल्क्यकृतंवाणीस्तो
त्रंयःप्रयतःपठेत् सुकवींद्रोमहावाग्मीबृहस्पतिसमोभवेत् ४५ महामूर्खश्चदुर्मेधावर्ष
वे वर्षमेकंयदापठेत् सपंडितश्चमेधावीसुकवीचभवेद्ध्रुवम् ४६ इतिश्रीब्रह्मवैवर्तेमहापुरा
णेनारायणनारदसंवादेप्रकृतिखंडेसरस्वत्युपाख्यानेनामपंचमोध्यायः ५ नाराय·
सरस्वतीसावैकुंठेस्वयंनारायणांतिके गंगाशापेनकलयाकलहाद्भारतेसरित् १ पुण्य
दापुण्यजननीपुण्यतीर्थस्वरूपिणी पुण्यवद्भिर्निषेव्याचस्थितिःपुण्यवतांमुने २ तपस्वि
नांतपोरूपातपस्याकाररूपिणी कृतपापेध्मदाहायज्वलदग्निस्वरूपिणी ३ ज्ञानेसरस्व
तीमेसदानायेमानवैर्भुवि तेषांस्थितिश्चवैकुंठेसुचिरंहरिसंसदि ४ भारतेकृतपापश्चा· ९

17A

स्नात्वा तत्रावलीलया मुच्यते सर्वपापेभ्यो विष्णुलोके वसेच्चिरं ५ चतुर्मास्यां पौर्णमास्यामक्ष
यायां दिनक्षये व्यतीपाते च ग्रहणेऽन्यस्मिन्पुण्यदिनेपि च ६ अनुषंगेन यः स्नाति हेलया श्र
द्धयापि वा सारूप्यं लभते नूनं वैकुंठे स हरेरपि स्नात्वा सरस्वतीमंत्रं मासमेकं च यो जपेत् म
हामूर्खः कवींद्रश्च स भवेन्नात्र संशयः नित्यं सरस्वतीतोये यः स्नाति मुंडयेच्छिरः न गर्भवासं कु
रुते पुनरेव स मानवः ९ इत्येवं कथितं किंचिद्भारतीगुणकीर्तनं सुखदं पुण्यदं सारं किं भूयः
श्रोतुमिच्छसि १० शौनक उवाच नारायणवचः श्रुत्वा नारदो मुनिसत्तमः पुनः पप्रच्छ संदे
हच्छेदं शौनक सत्वरम् ११ नारद उवाच कथं सरस्वती देवी गंगाशापेन भारते कलया क
ला नैव बभूव पुण्यदा सरित् १२ श्रवणे श्रुतिसाराणां वर्धते कौतुकं मम कथामृतानां
नो तृप्तिः केन श्रेयसि तृप्यते १३ कथं शशाप सा गंगा पूजितां तां सरस्वतीं शांता सत्वस्वरूपा च पुण्य
दा सर्वपुण्यदं १४ तपस्विन्योर्द्वयोर्वादकारणं श्रुतिसुंदरं नारायण उवाच दुर्लभं च समालोच्या
प्रजगाम वहिः सभां १५ गते नारायणे गंगा मम वाच निर्भयं रुषा वागधिष्ठातृदेवी सा वाकोपश्रव
णाहकरं १६ हे निर्लज्जे हे सकामे स्वामिगर्वं करोषि किं अधिकं स्वामिसौभाग्यं विज्ञापयितु
मिच्छसि १७ मानचूर्णं करिष्यामि तवाद्य हरिसंनिधौ किं करिष्यति ते कांतो मम चैव कांत
वल्लभे १८ इत्येवमुक्त्वा गंगायाः केशं ग्रहीतुमुद्यता वारयामास तां पद्मा मध्यदेशस्थिता

18

प्र·खं· सती १९ शशापवाणींतांपद्मामहत्कलवतीसती वृक्षरूपासरिद्रूपाभविष्यसिनसंशयः २०
१८ शापंश्रुत्वातुसादेवीनशशापचुकोपच तत्रैवदुःखितातस्थौवाणींधृत्वाकरेणच २१ अत्युद्ध
तांचतांदृष्ट्वाकोपप्रस्फुरिताधरा उवाचगंगातांवाणींपद्माचरक्तलोचना २२ गंगोवाच त्वमु
त्सृजमहोग्रांचपद्मेकिंमेकरिष्यति वाग्दुष्टावागधिष्ठातृदेवीयंकलप्रिया २३ यावतीयो
ग्यतास्यस्ययावतीशक्तिरेवच तथाकरोतुवादंचत्वयासार्द्धंदुर्मुखा २४ स्वबलंतन्ममरणो च
विज्ञापयितुमिच्छसि जानंतुसर्वेह्युभयोः प्रभावंविक्रमंसति २५ इत्येवमुक्त्वासादेवीवाण्यै
शापंददाविति सरिद्रूपा[illegible]भवतुसायात्वांसाचशशापह २६ अधोमर्त्यंसाप्रया
तुयांतियत्रैवपापिनः कलौतेषांचपापांशंलभिष्यसिनसंशयः २७ इत्येवंवचनंश्रुत्वा
तांशशापसरस्वती त्वमेवयास्यसिमहींपापिपापंलभिष्यसि २८ एतस्मिन्नंतरेतत्रभग
वानाजगामह चतुर्भुजश्चतुर्भिश्चपार्षदैश्चचतुर्भुजैः २९ सरस्वतींकरेधृत्वावारया
मासवक्षसि बोधयामासधर्मज्ञः सर्वज्ञानंपुरातनं ३० श्रुत्वारहस्यंतासांचशापस्यक
लहस्यच उवाचदुःखितास्ताश्चवाक्यंसामयिकंविभुः ३० श्रीनारायणउवाच लक्ष्मित्वं
कलयागच्छधर्मध्वजगृहंस्वतः अयोनिसंभवाभूमौतस्यकन्याभविष्यसि ३१ तत्रैवदैवदो
षेणवृक्षत्वंचलभिष्यसि मदंशस्यासुरस्यैवशंखचूडस्यकामिनी ३२ भूत्वापश्चाच्चम १८

18A

मत्पत्नी भविष्यसि न संशयः त्रैलोक्यपावनीनां च तुलसीति च भारते ३२ कलया च सरिद्भूता
पीत्रं गच्छ वरानने गंगयास्त्वमपि पश्चात्त्वमंशेन विश्वपावनी ३३ भारतं भारतीशापात्याप्रवाह्य
यपापिनां भागीरथस्तपस्त्वात्वां नेष्यति संकटं ३४ नाम्ना भागीरथी पूता भविष्यसि म
हीतले मदंशस्य समुद्रस्य जाया जायाऽधिमममाज्ञया ३५ मत्कलांशस्य भूपस्य शांतनोश्च सुरे
श्वरि गंगाशापेन कलया भारतं गच्छ भारती ३६ अमर्षस्य फलं भुंक्ष्व सपत्नीभ्यामिह च्यु
ता स्वयं च ब्रह्मसदनं ब्रह्मणः कामिनी भव ३७ गंगयातुशिवस्थानमत्र पद्मैव तिष्ठतु
शांता च क्रोधरहिता मद्भक्ता सत्त्वरूपिणी ३८ महासाध्वी महाभागा सुशीला धर्मचारिणी
यदंशा कलया सर्वा धर्मिष्ठाश्च पतिव्रताः ३९ शांतरूपाः सुशीलाश्च प्रतिविश्वेषु योषितः
तिस्रो भार्यास्त्रयः शालास्त्रयो भृत्याश्च बांधवाः ४० ध्रुवं वेदविरुद्धाश्च न तास्ते न मंगलप्रदाः
स्त्रीपुंवच्च गृहे येषां गृहिणः स्त्रीवशाः पुमान् ४१ निष्फलं जन्म वै तेषामशुभं च पदे पदे मु
खदुष्टा योनिदुष्टा यस्य स्त्री कलहप्रिया ४२ अरण्यं तेन गंतव्यं महारण्यं गृहाद्वरं जलानां
च स्थलानां च फलानां प्राप्तिरेव च ४३ सततं सुलभा तत्र न केषां च गृहेऽपि च वरमग्नौ स्थि
तिर्हिंस्रजंतूनां सन्निधौ सुखं ४४ ततोऽपि दुःखं पुंसां च दुष्टाद्धीमन्नियोऽध्रुवं व्याधिज्वाला
विषज्वालावरं पुंसां वरानने ४५ दुष्टस्त्रीणां मुखज्वाला मरणादतिरिच्यते पुंसः स्त्रीजि

19

तस्यैवतस्मात्तस्मात्तत्कंथवं स्वयंस्वकृतेकर्मणितस्यफलभाग्भवेत् समिदितोऽपरतः सर्व
ब्र·वै· त्रनरकंव्रजेत् ४७ यशःकीर्त्तिविहीनोयोजीवन्नपिमृतोहिसः बह्वीनांचसपत्नीनांनैकत्र
प्र·ख· श्रेयसःस्थितिः ४८ एकभार्यासदाबैनैववह्भार्यैःकदाचन गच्छगंगेशिवस्थानेब्रह्म॰
१९ स्थानेसरस्वती ४९ अत्रतिष्ठतुमद्गेहेसुशीलाकमलया सुसाध्यायाचपत्नीचसुशीला
चपतिव्रता ५० इहस्वर्गसुखंतस्यधर्ममोक्षःपरत्रच पतिव्रतायस्यपत्नीसचयुक्तःशुचिःसुखी
५१ जीवन्मुक्तोशुचिर्दुःखीदुःशीलापतिरेवच इत्युक्त्वाजगतांनाथोविररामचनारद श्रुत्वोच्चै
रुरुदुःसर्वाःसमालिंग्यपरस्परं तास्तुसर्वाःसमालोच्यक्रमेणोक्तुंसदीश्वरं ५३ कंपिताः
साश्रुनेत्रास्त्रशोकेचाप्रियेणच सरस्वत्युवाच विधायादेहिमेनाथदुष्टामांजन्मशोधने सस्वा
मिनापरित्यक्ताःकुतोजीवंतिकास्त्रियः जीवत्यागंकरिष्यामियोगेनभारतेध्रुवं ५५ अत्र
च्छितोनिपतनंप्राप्नुयादितिनिश्चितं गंगोवाच अहंकेनापराधेनत्वयात्यक्ताजगत्पते ५६
देहत्यागंकरिष्यामिनिर्दोषायावधंलभ निर्दोषाकामिनीत्यागंकरोतिनराधमः ५७
सयातिनरकेकल्पंकिंतेसर्वेश्वरस्यच महालक्ष्मीउवाच नाथसत्त्वस्वरूपस्त्वंकोपःकथ
महोतव ५८ प्रसादंकुरुभार्यायेसदीशस्यतमावरं भवंतंभारतीशापाद्दक्ष्यामिकला॰
यदि ५९ कतिकालंस्थितिस्तत्रकदाद्रक्ष्यामितेपदं पापंसंतिपापिनःपापंमयिस्नात्वावगा १९

19A

हत्वात् कदा तेन विमग्ना हमागमिष्यामि त्वत्पदं कलया तुलसीरूपा धर्मध्वजसुता सती
६१ भूत्वा कदा लभिष्यामि त्वत्पदांबुजमच्युत वृक्षरूपा भविष्यामि तदधिष्ठातृदेवता ६२ मा
मुद्धरिष्यसि कदा तन्मे ब्रूहि कृपानिधे गंगा सरस्वतीशापाद्यदि यास्यति भारते ६३ शापा
न्मुक्ता पापाश्च कदा त्वां विलभिष्यति गंगा शापेन सा वाणी यदि यास्यति भारते ६४ क
दा शापाद्विनिर्मुच्य लभिष्यति पदं तव तां वाणीं ब्रह्मसदनं गंगा वा शिवमंदिरे ६५ गन्तुं
वदसि हे नाथ तत्क्षमस्व च ते वच इत्युक्ता कमला कांतपदं धृत्वा ननाम च ६६ स्वकेशै
र्वेष्टनं कृत्वा रुरोद च पुनः पुनः उवाच पद्मनाभस्तां पद्मां कृत्वा स्ववक्षसि ६७ ईषद्धास्य
प्रसन्नास्यो भक्तानुग्रहकारकः श्रीनारायण उवाच त्वद्वाक्यमाचरिष्यामि स्ववाक्यं च सुरे
श्वरि समतां च करिष्यामि शृणु तत्क्रममेव च भारती यातु कलया सरिद्रूपा च भारते
६९ अर्द्धांशा ब्रह्मसदने स्वयं तिष्ठतु मद्गृहे तथैव चंद्रमौलेश्च स्थानं प्राप्स्यति दुर्लभं ७०
गंगा सा भारते हंता पापानां संभविष्यति कलांशांशेन त्वं गच्छ भारतं कमले भव ७१ पद्मा
वती सरिद्रूपा तुलसी वृक्षरूपिणी कलेः पंचसहस्रे च गते वर्षे च मोक्षणं ७२ युष्माकं स
रितां चैव मद्गृहे चागमिष्यथ संपदां हेतुभूता च विपत्तिः सर्वदेहिनां ७३ विना विपत्तिं

20

ब्र·वै· मद्धिमोकेषांपश्योद्भवेत् मन्मंत्रोपासकानांच सतं [illegible] स्नानावगाहना
प्र·ख· त् युष्माकंमोक्षणापापान्यापिदंशाच्चस्पर्शनात् पृथिव्यांयानितीर्थानिसंत्यस्नानानिसंद
२० ति ७५ भविष्यंतिचपूजानिमद्भक्तस्पर्शदर्शनात् मन्मंत्रोपासका भक्ताश्रमंतिभारतेसंति
७६ पूतंकर्तुंभारतेचस्वपवित्रांवसुंदरां मद्भक्तायत्रतिष्ठंतिपादंप्रक्षालयंतिच तत्स्था
नेचमहातीर्थंस्वपवित्रंभवेद्ध्रुवं स्त्रीघ्नोगोघ्नःकृतघ्नश्चब्रह्मघ्नोगुरुतल्पगः जीवन्मुक्तो
भवेत्पूतोमद्भक्तस्पर्शदर्शनात् एकादशीविहीनश्चसंध्याहीनोपिनास्तिकः ७८ नरघा
भवेत्पूतोमद्भक्तस्पर्शदर्शनात् असिजीवीमसीजीवीधावकःशूद्रयाजकः ७९ विश्वा
सघातीमित्रघ्नोमिथ्यासाक्षीप्रदायकः स्थाप्यहारभवेत्पूतोमद्भक्तस्पर्शदर्शनात् ८०
वृषवाहोभवेत्पूतोमद्भक्तस्पर्शदर्शनात् अश्वत्थघातकश्चैवमद्भक्तनिंदकस्तथा ८१
अनिवेद्यभोजीविप्रश्चपूतोमद्भक्तदर्शनात् पितरंभ्रातरंभार्यांमातरंनचयःसुता ८२
गुरोःकुलेचभगिनीवंशहीनेच [illegible]वांधव श्वश्रूंचश्वशुरंचैवयोनपुष्णातिनारद ८३ सम
हापातकीपूतोमद्भक्तस्पर्शदर्शनात् देवद्रव्यापहारीचविप्रद्रव्यापहारकः ८४ लाक्षा
लोहरसानांचविक्रेताद्दुहितस्तथा महापातकिनश्चैतेशूद्राणांशवदाहकाः ८५ भवे २०

20 A

दैतेर्वै स्नातमद्भक्तस्पर्शादर्शनात् महालक्ष्मीरुवाच भक्तानां लक्षणं ब्रूहि भक्तानुग्रहकातर
८९ येषां संदर्शनात्स्पर्शात्सद्यः पूता नराधमाः हरिभक्तिविहीना ये महाहंकारसंयुताः ९०
स्वप्रशंसास्वधर्मातास्वशठास्वसाधुनिंदकाः पुनंति साधुतीर्थानि येषां स्नानावगाहनात् ९१
येषां च पादरजसा पूता पादोदकान्मही येषां संदर्शनं स्पर्शं देवा वांछंति भारते ९२ सर्वेषां
परलाभो वैष्णवानां समागमाः नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ९३ ते पुनंत्युरु
कालेन विष्णुभक्ताः क्षणादहो सौतिरुवाच महालक्ष्मीवचः श्रुत्वा लक्ष्मीकांतः स्मितास्मि
तः ९४ निगूढतत्त्वं कथितुं सोपि श्रेष्ठोपचक्रमे नारायणउवाच भक्तानां लक्षणं ल।
क्ष्मि गूढं श्रुतिपुराणयोः ९५ पुण्यस्वरूपं पापघ्नं सुखदं भक्तिमुक्तिदं सारभूतं गोपनीयं न
वक्तव्यं खलेषु च ९६ त्वां पवित्रां प्राणतुल्यां कथयामि निशामय गुरुवक्त्राद्विष्णुमंत्रं य।
स्य कर्णे प्रविशति ९७ वदंति वेदवेदज्ञास्तं पवित्रं नरोत्तमं पुरुषाणां शतं पूर्वं शतं तु जन्म
मात्रतः ९८ स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणं येकस्मिन्नन्यत्र वा राजमलव्यपुर्ये च
जन्मसु ९९ जीवन्मुक्ताः स्युस्ते पूता यांति काले हरेः पदं मद्भक्तियुक्तो मत्पूजानियुक्तो मद्गुणा
न्वितः १०० मद्गुणाः श्लाघनीयश्च मामाविरिष्टश्च संततं मद्गुणश्रुतिमात्रेणश्रानंदपुल।

ब्र॰वै॰ कान्वितः १०१ सगद्गदः प्रसन्नेत्रः स्वात्मा विस्मृतएव च नवांछति स्वरूपं मुक्तिं सालोक्यादिचतु

प्र॰खं॰ ष्टयं २ ब्रह्मत्वममरत्वं वा तदिच्छा मम सेवने इंद्रत्वं च मनुत्वं च देवत्वं च सुदुर्लभं ३ स्वर्गराज्या

२१ दिभोगं च स्वप्नेपि च न हि वांछति ब्रह्मांडानि विनश्यंति देवा ब्रह्मादयस्तथा ९४ कल्पांते भक्ति

ग युक्तश्च मद्भक्तो न प्रणश्यति भ्रमंति भारते भक्ता लब्ध्वा जन्म सुदुर्लभं ५ तेपि यांति महीं पूतान

21 कृत्वा तीर्थं ममालयं इत्येवं कथितं सर्वं कुरु पद्मे यथोचितं ६ तदाज्ञया तथा चक्रुर्हरिस्तस्थौ

सुखासने १०२ इ श्री ब्र व पुराणे प्र खंडे रसस्य ख्यानेष यो यः

६ ना य उ च सरस्वती पुण्यक्षेत्रमाजगाम च भारते गंगाशापेन कलया स्वयं

तस्थौ हरेः पदे १ भारती भारतं गत्वा ब्राह्मी च ब्रह्मणः प्रिया वाग्धिष्ठात्री देवी सा तेन वाणी

प्रकीर्तिता २ पापिपापेः मदाह्वाय प… पश्चाद्भागीरथी नाम महीं भागी

रथी स्मृता ३ समाजगाम कलया वाणीशापेन नारद तत्रैव समये तां च दधार शिरसा ह

रः ४ वेगं सोढुमशक्तायाः प्रार्थितया विभुः पद्माजगाम कलया सा च पद्मावती न

दी ५ भारतं भारतीशापात्स्वयं तस्थौ हरेः पदे ततोन्यया सा कलया ललाभ जन्म भारते ।

६ धर्मध्वजसुता लक्ष्मीर्विख्याता तुलसीति च सरासरस्वतीशापात्स्वांशेन हरिशापतः

21A

बभूव वृन्दरूपा सा कलया विश्वपावनी कलेः पंचसहस्रं च वर्षं स्थित्वा भारते ८ जग्मुस्ताश्च
सरिद्रूपं विहाय श्रीहरेः पदं यानि सर्वाणि तीर्थानि काशीवृंदावनं विना ९ यास्यंति सार्धं ता
भिश्च वैकुंठमाज्ञया हरेः शालग्रामश्च हरेर्मूर्तिर्जगन्नाथश्च भारते १० कलेर्दशसहस्रांते ययौ
त्यक्त्वा हरेः पदं वैस्नवाश्च पुराणानि सख्यानि श्राद्धतर्पणं ११ वेदोक्तानि च कर्माणि ययु
स्तैः सार्धमेव च हरिपूजा हरेर्नाम तत्कीर्तिगुणकीर्तनं १२ वेदांगानि च शास्त्राणि ययुस्तैः
सार्धमेव च म्लेच्छशास्त्रं पठिष्यंति स्वशास्त्राणि विहाय च १३ ब्रह्मक्षत्रविशां वंशाः शू
द्राणामेवकाः कलौ सूपकारा धावकाश्च वृषवाहाश्च सर्वतः १४ सत्यहीना जनाः स
र्वे सस्यहीना च मेदिनी फलहीनाश्च तरवः पुत्रहीनाश्च योषितः १५ क्षीरहीनास्तथा गावः क्षी
रं सर्पिर्विवर्जितं दंपत्योः प्रीतिहीना च गृहीनः सत्यवर्जिताः १६ जलहीना नदा नद्यो दीर्घि
काः केदारादयः धर्महीनाः पुण्यहीना वर्णाश्च नाप एव च १७ लक्षेषु पुण्यवानेको नास्ति स्थि
ति ततः परं कुत्सिता विकृताकारा नरा नार्यश्च बालकाः १८ वार्त्ता कुत्सित शब्दोपि भवि
ष्यति ततः परं केचिद्ग्रामाश्च नगरा नरशून्या भवेदिति १९ केचित्स्वल्पाः कुटीमध्ये रेणुना च
समन्विताः अरण्यानि भविष्यंति ग्रामेषु नगरेषु च २० अरण्यवासिनः सर्वे प्रजाश्च क

22

रयीडिताः सस्यानि च भविष्यंति तडागेषु नदीषु च २१ प्रकृष्टानि च देशाणां सस्यहीनानि नि
ब्र॰वै॰ त्सरे प्रकृष्टदेशजा हीना भविष्यंति कलौ युगे २२ कलीकवादिनो धूर्ताः शठाश्चासत्यवा
प्र॰कृ॰ दिनः पापिनः पुण्यवंतं वा शिष्टाश्चाशिष्टमेव च २३ नितंद्रियं लंपटाश्च पुंश्चल्यश्च पतिव्र
२२ ताः तपस्विनं पातकिनो विप्रभक्तं स्ते वैष्णवाः २४ अहिंसकं दयाफल्कं चौराश्च नरघाति
नः भिक्षुवेशधरा धूर्ता निंदंतु परमंत्र च २५ भूतादिसेवानिपुणा जनानां मंदकारिणः
संप्रजिता स्ते भविष्यंति वंचका ज्ञानदुर्बलाः २६ वामनाव्याधियुक्ताश्च नरा नार्यश्च सर्व
तः स्वल्पायुषो जरायुक्ता यौवनेषु कलौ युगे २७ पलिताः षोडशे वर्षे महाव्यं हस्वविंश
तौ अष्टवर्षेषु युवती रजोयुक्ता च गर्भिणी २८ वत्सरांते प्रसूना स्त्री षोडशे न जराविव
लो ताः पत्रा काश्चित्सहस्ते पुत्र सर्वं वंध्याश्च कलौ युगे २९ कन्याविक्रयिणः सर्वे वर्णाश्चत्वार ए
व च मातृस्वपावधूनां च जारोपार्जनभक्षकाः ३० कन्यानां भगिनीनां च जारोपार्जनजी
विनः हरेर्नामविक्रयिणो भविष्यंति कलौ युगे ३१ स्वयमन्नस्य दानं च कीर्तिवर्धनहेत
वे तत्पश्चान्मनलोभाच्च स्वयमुल्लंघयिष्यति ३२ देववृत्तिं ब्रह्मवृत्तिं वृत्तिं गुरुकुलस्य २२
च स्वदत्तां परदत्तां वा सर्वमुल्लंघयेत्कलिः ३३ कन्यकामिनः केचित्केचिच्चश्वश्र

23A

गामिनः केचिद्वधूगामिनश्चकेचित्सर्वकामिनः ३४ भगिनीगामिनः केचित्स्वपत्नीमा
तृगामिनः श्रीभ्रजायागामिनश्चभविष्यंतिकलौयुगे ३५ स्वजानांचैवग्रामानांवस्तूनांचवि
शेषतः अलीकवादिनः सर्वेचोराभवंतिलंपटाः ३६ परस्परंहिंसकाश्चसर्वेचनरघातिनः
लाजालोहरमानांचव्यापारंलवणस्यच ३७ वृषवाहाविप्रवेशाः शूद्राणांशिवदाहकाः
शूद्रान्नभोजिनः सर्वेसर्वेचवृषलीरताः ३८ पंचपर्वेनित्यक्ताऋतुरात्रौचभोगिनः यज्ञ
सूत्रविहीनाश्चसंध्याशौचविहीनकाः ३९ पुंश्चलीबंधुसावीराकुटनीचरजस्वला विप्रा
णांरंधनागारेभविष्यंतिचपाचकाः ४० अन्नानांनियमोनास्तियोनीनांचविशेषतः
आश्रमाणांजनानांचसर्वेम्लेच्छाःकलौयुगे ४१ एवंकलौसंप्रवृत्तेसर्वंम्लेच्छमयंभवेत्
हस्तप्रमाणवृक्षेचांगुष्टमानेचमानवे ४२ विप्रस्यविष्णुयशसः पुत्रः कल्किर्भविष्यति
नारायणकलांशश्चभगवान्बलिनांवरः ४३ दीर्घेनाप्रमानश्च वर्षधारायुतामही लो
काशून्याःगृहाशून्याभविष्यंतितनोमुने ४४ ततश्चद्वादशादित्याः करिष्यंत्युदयंमुने
प्राप्नोतिशुष्कतांपृथ्वीसमातेषांचतेजसा ४५ कलौगतेचद्वापरेसंप्रवृत्तेकृतेयुगे त
पः सद्याःसमायुक्ताधर्मिष्ठाभविष्यति ४६ तपस्विनश्चधर्मिष्ठावेदज्ञाब्राह्मणाभवि

24

ब्र·वै· पतिव्रताश्चधर्मिष्ठायोषितश्चगृहेगृहे राजानःक्षत्रियासर्वेविप्रभक्तामहात्मनः प्रतापवं
प्र·ख· तोधर्मिष्ठाःपुण्यकर्मरतासदा ४८ वैश्यावाणिज्यनिरताविप्रभक्ताश्चधार्मिकाः शूद्राश्च
२४ पुण्यशीलाश्चधर्मिष्ठाःपुण्यसेविनः ४९ लेशोनास्तिह्यधर्मस्यपूर्णोहितेकलौयुगे धर्म
स्त्रिपाच्चत्रेतायांद्विपादोद्वापरेस्मृतः ५० कलौमतेचैकपादःसर्वलुप्तस्ततःपरं वाराःस
प्तयथाविप्रतिथयःषोडशस्मृताः ५१ यथाद्वादशमासाश्चऋतवःषट्चवैद्विज द्वौपक्षा
वःअयनेद्वेच चतुर्भिःप्रहरैर्दिनं ५२ चतुर्भिःप्रहरैरात्रिस्त्रिंशद्दंडोदिनंतथा वर्षपंचवि
धोत्तयःकालःसंख्याविधिक्रमे ५३ यथाचायंतथैवतथायुगचतुष्टयं वर्षपूर्णेन
राणांचदेवानांदिवानिशं ५४ शतत्रयेषष्ट्यधिकेनराणांचयुगोमतः मन्वंतरंतु
दिव्यानांयुगानामेकसप्ततिः ५५ मन्वंतरसमंतेषामिंद्रायुःपरिकीर्तितं अष्टाविंशति
मेचैंद्रेगतेब्रह्मदिवानिशं ५६ अष्टोत्तरशतेवर्षेगतेपातश्चब्रह्मणः प्रलयःप्राकृतोज्ञे
यस्तत्राप्यदृष्टावसुंधरा ५७ जलप्लुतानिविश्वानिब्रह्मविष्णुशिवादयः लयेप्राकृतिके लु
लीनेयातेतत्त्वब्रह्मणोमुने ५८ निमेषमात्रंकालश्चकृष्णस्यपरमात्मनः एवंनशेषनिस
र्वाणिब्रह्मांडान्यखिलानिच ५९ निमेषमात्रंप्रलयेयत्रविश्वंजलप्लुतं निमेषानंतरेका २४

लेपुनः सृष्टिक्रमेणच एवंकतिविधासृष्टिर्लयःकतिविधोपिवा कतिकृत्वोगतायातः
संख्यांज्ञातानातिकः पुमान् ६१ ब्रह्मांडानांचसर्वेषामीश्वरश्चैवएवसः सर्वेषांपरमात्मा
चश्रीकृष्णःप्रकृतेपरः ६२ ब्रह्मादयश्चतस्यांशास्तस्यांशश्चमहाविराट् तस्यांशश्चवि
राट्क्षुद्रस्तस्यांशाप्रकृतिःस्मृता ६३ सचकृष्णोद्विधाभूतोद्विभुजश्चचतुर्भुजः चतु
भ र्भुजोवैकुंठेगोलोकेद्विभुजःस्वयः ६४ ब्रह्मादितृणपर्यंतंसर्वंप्राकृतिकंभवेत् यद्यः
प्राकृतिकंसृष्टंसर्वंनैश्वरमेवच ६५ एवंहिसृष्टिहेतुंतंसत्यंनित्यंसनातनं सेच्छामयं
परंब्रह्मनिर्लिप्तंनिर्गुणंपरं ६६ निरुपाधिनिराकारंभक्तानुग्रहविग्रहं अतीवकम
नीयंचनवीननीरदप्रदं ६७ करोतिब्रह्माब्रह्मांडंयज्ज्ञानाघकलोद्भव शिवोमृत्युंजय-
श्चैवसंहर्त्तासर्वतत्त्ववित् ६८ यस्यज्ञानाघतपसासर्वेशस्तत्समोमहान् महाविभूति
युक्तश्चसर्वज्ञःसर्वदःस्वयं ६९ सर्वव्यापीसर्वपातानाप्रदातासर्वसंपदां विष्णुःसर्वेश्वरः
श्रीमान्यस्यज्ञानाज्जगत्पतिः ७० महामायाचप्रकृतिःसर्वशक्तिमशेश्वरी ब्रह्मणाय
स्यतपसायज्ज्ञानायस्यसेवया ७१ सावित्रीवेदमाताचसावेदाधिष्ठातृदेवता सर्वग्रा-
मादिदेवीसासर्वसंपत्प्रदायिनी ७२ सर्वेश्वरीसर्ववेद्यासर्वपापप्रहिंसिनी सर्वस्त्र

25

नाचसर्वज्ञादुर्गादुर्गतिनाशिनी ७३ कृष्णवामांससंभूताकृष्णप्राणाधिदेवता कृष्ण
ब्र॰वै॰ प्राणाधिकाप्रेम्णाभाधिकाकृष्णसेवया ७४ सर्वाधिकंचरूपंसौभाग्यमानगौरवं कृष्णव
प्र॰खं॰ क्षःस्थलस्थानंपत्नीत्वंप्रापसेवया ७५(सर्वाधिकंचरूपंचसौभाग्यमानगौरवं) तपश्चका
२५ रसास्वंशात्तस्यांगेचपर्वते ७६ दिव्यंवर्षसहस्रंचनिराहाराकृशासती कृशांगनिश्वासर
हितांदृष्टाचंद्रकलोपमां ७७ कृष्णोवक्षःस्थलेकृत्वारुरोदकृपयाविभुः वरंतस्यैददौ
सारंसर्वेषामपिदुर्लभं ७८ ममवक्षःस्थलेतिष्ठमयितेभक्तिरस्त्विति सौभाग्येनचमाने
नप्रेम्णागौरवेणच ७९ सर्वस्त्रीषुचमेश्रेष्ठाज्येष्ठाचसर्वयोषितां वरिष्ठागरिष्ठाच
संस्तुतापूजितामया ८० सततंतववश्योहंराध्यश्चस्त्वीनवर्तते इत्युक्त्वाजगतांनाथश्च
कारचेतनांततः ८१ सपत्नीरहितांतांचचकारप्राणवल्लभां अस्यजायाश्चदेवश्चपूजिता
तस्यसेवया ८२ तपस्यायादृशीयासांतासांतादृक्फलंस्मृते दिव्यंवर्षसहस्रंवतपस्त्वसा
हिमालये ८३ दुर्गावत्तत्पदंध्यात्वासर्वपूज्याबभूवह सरस्वतीतपस्तप्त्वापर्वतेगंधमाद
ने ८४ लक्षवर्षंचदिव्यंसर्ववंद्याबभूवसा लक्ष्मीर्युगशतंदिव्यंतपस्तप्त्वाचपुष्करे
८५ सर्वसंपत्प्रदात्रीचबभूवतस्यसेवया सावित्रीमलयेतप्त्वापूज्याबभूवसा षष्टिव २५

25A

र्षसहस्रंचदिव्यंध्यात्वातत्पदे शतमन्वंतरंतमंशं करेणधराविभो ८७ शतमन्वंतरंचैव
ब्रह्मणानस्यभक्तितः शतमन्वंतरंविस्नस्तत्वापातावभूवह ८८ मन्वंतरंतसूर्यश्चशक्रश्च
द्रस्तथैवच दिव्यंशतयुगंचैवधर्मस्तत्वाचभक्तितः ८९ सर्वप्राणाःसर्वपूज्यःसर्वाधारो
वभूवसः एवंकृत्स्नस्यतपसासर्वेदेवाश्चपूजिताः ९० मुनयोमनवोभूपाब्रह्मणाश्चैवपूजि
ताः एवंकथितंसर्वंपुराणंचयथागमं ९१ गुरुवक्त्राद्यथाज्ञानंकिंभूयःश्रोतुमिच्छसि
९२ इतिश्रीमहामनपुराणेप्रकृतिखंडेनारायणनारदसंवादेकलिकल्पवर्णनानिरू
पणंनामसप्तमोध्यायः ७ नारदउवाच हरिर्निमेषमात्रेणब्रह्मणःपातएवच तस्य
पातेप्राकृतिकःप्रलयःपरिकीर्तितः १ प्रलयेप्राकृतेचोक्तंतथादृष्टावसुंधरा जल
प्लुतानिविश्वानिसर्वेलीनाहराविति २ वसुंधरातिरोभूताकुत्रतिष्ठतिमेदिनी सृष्टे
विधानसमयेसाविर्भूताकथंपुनः ३ कथंवभूवसाधन्यामान्यासर्वाश्रयाजया त
स्याश्चजन्मकथनंवदमंगलकारिण ४ नारायणउवाच सर्वादिसृष्टेसाजन्मकृत्स्ना
दितिश्रुतंमयावाता आविर्भावतिरोभावोसर्वेषुप्रलयेषुच ५ श्रूयतांवसुधाजन्मस
र्वमंगलमंगलं विघ्ननिघ्नकरंपापनाशनंपुण्यवर्द्धनम् ६ अहोकेचिद्वदंतीति

ब्र·वै·
प्र·खं·

मध्यकेदृशमेवास्ते सर्वभूतस्थवन्यातद्धिरूपमेवेह तेजसापरा ७ ऊचुतस्तोपुराविस्तंतद्दिष्टयुद्धेन
तेजसा आवांत्वद्वितयत्नैर्वीर्यमाभ्रंशं तेतिच ८ तयोर्जीवनकालेनप्रत्यक्ष्यावभवेस्फुटं
ततोवभूवमेदस्त्वमरणानंतरंतयोः ९ मेदिनीतिचविख्याताउत्पन्नातन्मतेश्वरणा जल
यौन्नाकृणांपूर्वंतद्हितामेदस्तायतः १० कथयामिवतज्जन्मसार्थकसम्मतं पुराश्रुतंयच्छ्रु
त्यक्तंधर्मवक्त्राचशंकरे ११ महाविराट्शरीरस्यजलस्थस्यचिरंस्फुटं मनोवभूवकालेना
सर्वांगोव्यापकंध्रुवं १२ सचप्रविष्टःसर्वेषांतल्लोमांविवरेषुच कालेनमहतातस्मा
दभूवववसुधामुने १३ प्रत्येकंप्रतिलोम्नांचकूपेषुसास्थितास्थिरा आविर्भूतातिरोभूता
सजलाचपुनःपुनः १४ आविर्भूतासृष्टिकालेतज्जलोपरिपूस्थिता प्रलयेचतिरोभू
